। नोऽसि । असि जुष्टिं । जुष्टिं ते । ते गमेयं । गमेयं मनः । मनो ज्योतिः । ज्योतिर्जुषतां । जुषतामाज्यं । आज्यं विच्छिन्नं । विच्छिन्नं यज्ञं । विच्छिन्नमिति वि-छिन्नं । यज्ञꣳ सं । समिमं । इमं दधातु । दधाबितिं दधातु ॥ बृहस्पतिस्तनुतां । तनुतामिमं । इमं नः । नो विश्वे । विश्वे देवाः । देवा इह । इह मादयंताम् । मादयंतामिति मादयंताम् ॥ ब्रध्न पिन्वस्व । पिन्वस्व ददतः । ददतो मे । मे मा । मा क्षायि । क्षायि कुर्वतः । कुर्वतो मे । मे मा । मोपं । उपं दसत् । दसत्प्रजापतेः । प्रजापतेर्भागः । प्रजापतेरितिं प्रजा-पतेः । भागोसि । अस्यूर्जस्वान् । ऊर्जस्वान् पयस्वान् । पयस्वान् प्राणापानौ । प्राणापानौ मे । प्राणापानाविति प्राण-अपानौ । मे पाहि । पाहि समानव्यानौ । समानव्यानौ मे । समानव्यानाविति समान व्यानौ । मे पाहि । पाह्युदानव्यानौ । उदानव्यानौ मे । उदानव्यानावित्युदान-व्यानौ । मे पाहि । पाह्यक्षितः । अक्षितोऽसि । अस्यक्षित्यै । अक्षित्यै बा । बा मा । मा मे । मे क्षेष्ठाः । क्षेष्ठा अमुत्र । अमुत्रामुष्मिन् । अमुष्मिन्लोके । लोक इतिं लोके () ॥॥

काण्ड -1, प्रपाठक -6, अनुवाक -4, अनुवाक सूक्तम -1,

प्राजापत्य-काण्डम् -विषयः -याजमानम्,

बर्हिषोऽहं । अहं देवयज्ययाँ । देवयज्ययाँ प्रजावाँन् । देवयज्ययेतिं देव-यज्ययाँ । प्रजावाँन्भूयासं । प्रजावानितिं प्रजा-वान् । भूयासं नराशꣳसस्य । नराशꣳसस्याहं । अहं देवयज्ययाँ । देवयज्ययां पशुमान् । देवयज्ययेतिं देव-

यज्यया॑ । पशुमान्भूयासं । पशुमानिति॑ पशु-मान् । भूयासमग्नेः । अग्नेः स्विष्टकृतः॑ । स्विष्टकृतो॑ऽहं । स्विष्टकृत इति॑ स्विष्ट-कृतः॑ । अहं॑ देवयज्यया॑ । देवयज्यया युष्मान् । देवयज्ययेति॑ देव-यज्यया॑ । आयुष्मान्, यज्ञेन॑ । यज्ञेन॑ प्रतिष्ठां । प्रतिष्ठां गमेयं । प्रतिष्ठामिति॑ प्रति-स्थाम् । गमेयमग्नेः । अग्नेरहं । अहमुज्जि॑तिम् । उज्जि॑तिमनु॑ । उज्जि॑तिमित्युत्-जि॑ति॑ । अनूत् । उज्जे॑षं । जे॑षꣳ सोम॑स्य । सोम॑स्याहं । अहमुज्जि॑तिं । उज्जि॑तिमनु॑ । उज्जि॑तिमित्युत्-जि॑ति॑ । अनूत् । उज्जे॑षं । जे॑षमग्नेः । अग्नेरहं । अहमुज्जि॑तिम् । उज्जि॑तिमनु॑ । उज्जि॑तिमित्युत्-जि॑ति॑ । अनूत् । उज्जे॑षं । जे॑षमग्नीषोम॑योः । अग्नीषोम॑योरहं । अग्नीषोम॑योरित्यग्नी-सोम॑योः । अहमुज्जि॑तिं । उज्जि॑तिमनु॑ । उज्जि॑तिमित्युत्-जि॑ति॑ । अनूत् । उज्जे॑षं । जे॑षमिंद्राग्नियोः । इंद्राग्नियोरहं । इंद्राग्नियोरितींद्र-अग्नियोः । अहमुज्जि॑तिं । उज्जि॑तिमनु॑ । उज्जि॑तिमित्युत्-जि॑ति॑ । अनूत् । उज्जे॑षं । जे॑षमिंद्र॑स्य । इंद्र॑स्याहं ()

काण्ड -1, प्रपाठक -6, अनुवाक -4, अनुवाक सूक्तम -2,

प्राजापत्य-काण्डम् -विषयः -याजमानम्,

। अहमुज्जि॑तिं । उज्जि॑तिमनु॑ । उज्जि॑तिमित्युत्-जि॑ति॑ । अनूत् । उज्जे॑षं । जे॑षं महेंद्र॑स्य॑ । महेंद्रस्याहं । महेंद्र॑स्येति॑ महा-इंद्र॑स्य॑ । अहमुज्जि॑तिं । उज्जि॑तिमनु॑ । उज्जि॑तिमित्युत्-जि॑ति॑ । अनूत् । उज्जे॑षं । जे॑षमग्नेः । अग्नेः स्विष्टकृतः॑ । स्विष्टकृतो॑ऽहं । स्विष्टकृत इति॑ स्विष्ट-कृतः॑ । अहमुज्जि॑तिं । उज्जि॑ति-मनु॑ । उज्जि॑तिमित्युत्-जि॑ति॑ । अनूत् । उज्जे॑षं । जे॑षं वाज॑स्य । वाज॑स्य मा । मा प्रसवे॑न । प्रसवे॑नोद्भा॒भेण॑ । प्रसवे॑नेति॑ प्र-सवे॑न । उद्भा॒भेणो॑त् । उद्भा॒भेणेत्युत्-भा॒भेण॑ । उद॑ग्रभीत् । अग्रभी॑दित्य॑ग्रभीत् ॥ अथा॑ सपत्ना॑न् । सपत्ना॒ इंद्रः॑ । इंद्रो॑ मे । मे निग्रा॒भेण॑ । निग्रा॒भेणाध॑रान् । निग्रा॒भेणेति॑ नि-ग्रा॒भेण॑ । अध॑राꣳ अकः । अक॒रित्य॑कः ॥ उद्भा॑भं च॑ । उद्भा॒भमित्युत्- भा॒भम् । च निग्रा॒भं । निग्रा॒भं च॑ । निग्रा॒भमिति॑ नि-ग्रा॒भम् । च ब्रह्म॑ । ब्रह्म॑ देवाः । देवा अ॑वीवृधन् । अवीवृधन्नित्य॑वीवृधन् ॥ अथा॑ सपत्ना॑न् । सपत्ना॑निंद्राग्नी । इंद्राग्नी मे॑ । इंद्राग्नी इतींद्र-अग्नी । मे विषू॒चीना॑न् । विषो॒चीना॒न् वि । व्य॑स्यताम् ।

अस्यतामित्यस्यताम् ॥ ए माः । इमा अग्मन्न् । अग्मन्नाशिषः । आशिषो दोहकामाः । आशिष इत्याँ-शिषः । दोहकामा इंद्र- वंतः । दोहकामा इति दोह-कामाः । इंद्रवंतो वनामहे । इंद्रवंत इतींद्र-वंतः ()

काण्ड -1, प्रपाठक -6, अनुवाक -4, अनुवाक सूक्तम -3,

प्राजापत्य-काण्डम् -विषयः -याजमानम्,

। वनामहे धुक्षीमहि । धुक्षीमहि प्रजाम् । प्रजामिषँ । प्रजामिति प्र-जाम् । इषमितीषँम् ॥ रोहितेन त्वा । त्वाग्निः । अग्निर्देवताँ । देवताँ गमयतु । गमयतु हरिभ्यां । हरिभ्यां त्वा । हरिभ्यामिति हरि-भ्यां । त्वेंद्रः । इंद्रो देवताँ । देवताँ गमयतु । गमयत्वेतशेन । एतशेन त्वा । त्वा सूर्यः । सूर्यो देवताँ । देवताँ गमयतु । गमयतु वि । वि तै । ते मुंचामि । मुंचामि रशनाः । रशना वि । वि रश्मीन् । रश्मीन्, वि । वि योक्राँ । योक्रा यानि । यानि परिचर्तनानि । परिचर्तनानि धत्तात् । परिचर्तनानीति परि-चर्तनानि । धत्तादस्मासु । अस्मासु द्रविणं । द्रविणं यत् । यच्च । च भद्रं । भद्रं प्र । प्र णः । नो ब्रूतात् । ब्रूताद्भागधान् । भागधान्देवतासु । भागधानिति भाग-धान् । देवतास्विति देवतासु ॥ विष्णोः शंयोः । शंयोरहं । शंयोरिति शं-योः । अहं देवयज्ययाँ । देवयज्ययां यज्ञेन । देवयज्ययेति देव-यज्ययाँ । यज्ञेन प्रतिष्ठां । प्रतिष्ठां गमेयं । प्रतिष्ठामिति प्रति-स्थाम् । गमेयꣳ सोमस्य । सोमस्याहं । अहं देवयज्ययाँ । देवयज्ययां सुरेताः । देवयज्ययेति देव-यज्ययाँ ()

काण्ड -1, प्रपाठक -6, अनुवाक -4, अनुवाक सूक्तम -4,

प्राजापत्य-काण्डम् -विषयः -याजमानम्,

सुरेतारेतः । सुरेता इति सु-रेताः । रेतोधिषीय । धीषीय त्वष्टुः । त्वष्टुरहं । अहं देवयज्ययाँ । देवयज्ययां पशूनां । देवयज्ययेति देव-यज्ययाँ । पशूनाꣳ रूपं । रूपं पुषेयं । पुषेयं देवानाँ । देवानां पत्नीः । पत्नीरग्निः । अग्निर्गृहपतिः । गृहपतिर्यज्ञस्य । गृहपतिरिति गृह-पतिः । यज्ञस्य मिथुनं । मिथुनं तयोः । तयोरहं । अहं देवयज्ययाँ । देवयज्ययां

मिथुनेन॑ । दे॒व॒यज्ययेति॑ देव-यज्ययाँ॑ । मि॒थु॒नेन॒ प्र । प्र भूया॑सं । भूया॒स॒ꣳ वेदः॑ । वेदोऽसि । अ॒सि॒ वित्तिः॑ । वित्ति॑रसि । अ॒सि॒ वि॒देय॑ । वि॒देय॒ कर्म॑ । कर्मा॑सि । अ॒सि॒ कु॒रुणँ॑ । कु॒रुण॑मसि । अ॒सि॒ क्रि॒यासँ॑ । क्रि॒यास॑ꣳ सनिः । सनि॑रसि । अ॒सि॒ स॒नि॒ता । स॒नि॒तासि॑ । अ॒सि॒ स॒नेयँ॑ । स॒नेय॑ घृ॒तव॑तं । घृ॒तव॑तं कु॒ला॒यिनँ॑ । घृ॒तव॑त॒मिति॑ घृ॒त-व॒त॒ं । कु॒ला॒यिन॑ꣳ रायः । रा॒यस्पोषँ॑ । पोष॑ꣳ सह॒स्रिणँ॑ । स॒ह॒स्रिण॑ वेदः । वेदो द॑दातु । द॒दा॒तु॒ वा॒जिनँ॑ । वा॒जिन॒मिति॑ वा॒जिनँ॑ () ॥॥

काण्ड -1, प्रपाठक -6, अनुवाक -5, अनुवाक सूक्तम -1,

प्राजापत्य-काण्डम् -विषयः -याजमानम्,

आप्या॑यतां । प्या॒य॒तां॒ ध्रुवा । ध्रुवा घृ॒तेन॑ । घृ॒तेन॑ य॒ज्ञंय॑ज्ञं । य॒ज्ञंय॑ज्ञं प्रति॑ । य॒ज्ञंय॑ज्ञ॒मिति॑ य॒ज्ञं-य॒ज्ञ॒ं । प्रति॑ दे॒व॒यद्भ्यः॑ । दे॒व॒यद्भ्य॒ इति॑ देव॒यत्-भ्यः॑ ॥ सूर्या॑या ऊधः॑ । ऊधोऽदि॑त्याः । अदि॑त्या उ॒पस्थे॑ । उ॒पस्थ॑ उरुधा॑रा । उ॒पस्थ॒ इत्यु॒प-स्थे॒ । उ॒रु॒धा॑रा पृथि॒वी । उ॒रु॒धा॒रेत्यु॑रु-धा॒रा॒ । पृ॒थि॒वी य॒ज्ञे । य॒ज्ञे अ॒स्मिन् । अ॒स्मिन्नित्य॒स्मिन् । प्र॒जाप॑तेर्विभान्न् । प्र॒जाप॑तेरिति॑ प्र॒जा-प॒तेः॒ । वि॒भान्नाम॑ । वि॒भानिति॑ वि-भान् । नाम॑ लो॒कः॒ । लो॒कस्तस्मिन्न्॑ । तस्मि॒ꣳ॒स्त्वा । त्वा द॒धामि॑ । द॒धामि॑ स॒ह॒ । स॒ह॒ यज॑मानेन । यज॑मानेन॒ सत् । सद॑सि । अ॒सि॒ सत् । सन्मै॑ । मे॒ भूया॒ः । भूया॒ः सर्वँ॑ । सर्व॑मसि । अ॒सि॒ सर्वँ॑ । सर्व॑ं मे । मे॒ भू॒ꣳ॒॑ । भूया॒ः पूर्ण॑ं । पूर्ण॑मसि । अ॒सि॒ पूर्ण॑ं । पूर्ण॑ं मैँ । मे॒ भूया॒ः । भूया॒ अक्षि॑तं । अक्षि॑तमसि । अ॒सि॒ मा । मा मैँ । मे॒ क्षेष्ठा॒ः । क्षेष्ठा॒ः प्राच्याँ॑ । प्राच्याँ॑ दि॒शि । दि॒शि दे॒वाः । दे॒वा ऋ॒त्वि॒जः॑ । ऋ॒त्वि॒जो॑ मार्जयंतां । मा॒र्ज॒यं॒ता॒ं दक्षि॑णायां ()

काण्ड -1, प्रपाठक -6, अनुवाक -5, अनुवाक सूक्तम -2,

प्राजापत्य-काण्डम् -विषयः -याजमानम्,

। दक्षिणायां दिशि । दिशि मासाँः । मासाँः पितरः । पितरो मार्जयंतां । मार्जयंतां प्रतीच्याँ । प्रतीच्याँ दिशि । दिशि गृहाः । गृहाः पशवः । पशवो मार्जयंतां । मार्जयंतामुदीच्यां । उदीच्यां दिशि । दिश्यापः । आप ओषधयः । ओषधयो वनस्पतयः । वनस्पतयो मार्जयंतां । मार्जयंतामूर्ध्वायाँ । ऊर्ध्वायाँ दिशि । दिशि यज्ञः । यज्ञः संवथ्सरः । संवथ्सरो यज्ञपतिः । संवथ्सर इति सं-वथ्सरः । यज्ञपतिर्मार्जयंतां । यज्ञपतिरिति यज्ञ-पतिः । मार्जयंतां विष्णोँः । विष्णोः क्रमः । क्रमोऽसि । अस्यभिमातिहा । अभिमातिहा गायत्रेण । अभिमाति हेत्यभिमाति-हा । गायत्रेण छंदसा । छंदसा पृथिवीं । पृथिवीमनु । अनु वि । विक्रमे । क्रमे निर्भक्तः । निर्भक्तः सः । निर्भक्त इति निः-भक्तः । स यं । यं द्विष्मः । द्विष्मो विष्णोँः । विष्णोः क्रमः । क्रमोऽसि । अस्यभिशस्तिहा । अभिशस्तिहा त्रैष्टुभेन । अभिशस्ति हेत्यभिशस्ति-हा । त्रैष्टुभेन छंदसा । छंदसांतरिक्षं । अंतरिक्षमनु । अनु वि । वि क्रमे । क्रमे निर्भक्तः । निर्भक्तः सः । निर्भक्त इति निः-भक्तः । स यं । यं द्विष्मः । द्विष्मो विष्णोँः । विष्णोः क्रमः । क्रमोऽसि । अस्य रातीयतः । अरातीयतो हंता । हंता जागतेन । जागतेन छंदसा । छंदसा दिवँ । दिवमनु । अनु वि । विक्रमे । क्रमे निर्भक्तः । निर्भक्तः सः । निर्भक्त इति निः- भक्तः । स यं । यं द्विष्मः । द्विष्मो विष्णोँः । विष्णोः क्रमः । क्रमोऽसि । असि शत्रूयतः । शत्रूयतो हंता । शत्रूयत इति शत्रु-यतः । हंताऽऽ- नुष्टुभेन । आनुष्टुभेन छंदसा । आनुष्टुभेनेत्यानु-स्तुभेन । छंदसा दिशः । दिशो नु । अनु वि । वि क्रमे । क्रमे निर्भक्तः । निर्भक्तः सः । निर्भक्त इति निः- भक्तः । स यं । यं द्विष्मः । द्विष्म इति द्विष्मः () ॥॥

काण्ड -1, प्रपाठक -6, अनुवाक -6, अनुवाक सूक्तम -1,

प्राजापत्य-काण्डम् -विषयः -याजमानम्,

अगन्म सुवः । सुवः सुवः । सुवरगन्म । अगन्म संदृशः । संदृशस्ते । संदृश इति सं-दृशः । ते मा । मा छिंत्सि । छिंत्सि यत् । यत्तँ । ते तपः । तपस्तस्मैँ । तस्मै ते । ते मा । मा वृक्षि । आ वृक्षि । वृक्षि सुभूः । सुभूरसि । सुभूरिति सु-भूः । असि श्रेष्ठः । श्रेष्ठो रश्मीनां । रश्मीनामायुर्धाः । आयुर्धा असि । आयुर्धा इत्यायुः-धाः । अस्यायुः ।

आयुर्मे । मे देहि । देहि वर्चोधाः । वर्चोधा असि । वर्चोधा इति वर्चः-धाः । असि वर्चः । वर्चो मयि । मयि देहि । देहीदं । इदमहं । अहममुं । अमुं भ्रातृव्यं । भ्रातृव्यमाभ्यः । आभ्यो दिग्भ्यः । दिग्भ्योऽस्यै । दिग्भ्य इति दिक्-भ्यः । अस्यै दिवः । दिवोऽस्मात् । अस्मादंतरिक्षात् । अंतरिक्षादस्यै । अस्यै पृथिव्याः । पृथिव्या अस्मात् । अस्मादन्नाद्यात् । अन्नाद्यान्निः । अन्नाद्यादित्यन्न-अद्यात् । निर्भजामि । भजामि निर्भक्तः । निर्भक्तः सः । निर्भक्त इति निः-भक्तः । स यं । यं द्विष्मः । द्विष्म इति द्विष्मः ()

काण्ड -1, प्रपाठक -6, अनुवाक -6, अनुवाक सूक्तम -2,

प्राजापत्य-काण्डम् -विषयः -याजमानम्,

। सं ज्योतिषा । ज्योतिषाभूवं । अभूवमैंद्रीं । ऐंद्रीमावृतं । आवृतमन्वावर्ते । आवृतमित्या-वृतं । अन्वावर्ते सं । अन्वावर्त इत्यनु-आवर्ते । समहं । अहं प्रजया । प्रजया सं । प्रजयेति प्र-जया । सं मया । मया प्रजा । प्रजा सं । प्रजेति प्र-जा । समहं । अहꣳ रायः । रायस्पोषेण । पोषेण सं । सं मया । मया रायः । रायस्पोषः । पोषः समिद्धः । समिद्धो अग्ने । समिद्ध इति सं-इद्धः । अग्ने मे । मे दीदिहि । दीदिहि समेद्धा । समेद्धा तै । समेद्धेति सं-एद्धा । ते अग्ने । अग्ने दीदासं । दीदासं वसुमान् । वसुमान् यज्ञः । वसुमानिति वसु-मान् । यज्ञो वसीयान् । वसीयान्भूयासं । भूयासमग्नै । अग्न आयूꣳषि । आयूꣳषि पवसे । पवस आ । आ सुव । सुवोर्जं । ऊर्जमिषं । इषं च । च नः । न इति नः ॥ आरे बाधस्व । बाधस्व दुच्छुनां । दुच्छुनामिति दुच्छुनां ॥ अग्ने पवस्व । पवस्व स्वपाः । स्वपा अस्मे । स्वपा इति सु-अपाः । अस्मे वर्चः । अस्मे इत्यस्मे । वर्चः सुवीर्यं । सुवीर्यमिति सु-वीर्यं ()

काण्ड -1, प्रपाठक -6, अनुवाक -6, अनुवाक सूक्तम -3,

प्राजापत्य-काण्डम् -विषयः -याजमानम्,

। दधत्पोषँ । पोषꣳ रयिं । रयिं मयिं । मयीति मयिं ॥ अग्ने गृहपते । गृहपते सुगृहपतिः । गृहपत इति गृह- पते । सुगृहपतिरहं । सुगृहपतिरिति सु-गृहपतिः । अहं ब्रयाँ । ब्रया गृहपतिना । गृहपतिना भूयासं । गृहपतिनेति गृह-पतिना । भूयासꣳ सुगृहपतिः । सुगृहपतिर्मयाँ । सुगृहपतिरिति सु-गृहपतिः । मया ब्रं । ब्रं गृहपतिना । गृहपतिना भूयाः । गृहपतिनेति गृह-पतिना । भूयाः शतं । शतꣳ हिमाँः । हिमास्तां । तामाशिषँ । आशिष मा । आशिषमित्याँ-शिषँ । आशासे । शासे ततवे । ततवे ज्योतिष्मतीं । ज्योतिष्मतीं तां । तामाशिषँ । आशिष मा । आशिषमित्याँ-शिषँ । आशासे । शासेऽमुष्मैँ । अमुष्मे ज्योतिष्मतीं । ज्योतिष्मतीं कः । कस्त्वाँ । त्वा युनक्ति । युनक्ति सः । स त्वाँ । त्वा वि । विमुचतु । मुचत्वग्नैँ । अग्नैँ व्रतपते । व्रतपतेव्रतं । व्रतपत इति व्रत- पते । व्रतमचारिषं । अचारिषं तत् । तदशकं । अशकं तत् । तन्मैँ । मेऽराधि । अराधि यज्ञः । यज्ञो बभूव । बभूव सः । स आ ()

काण्ड -1, प्रपाठक -6, अनुवाक -6, अनुवाक सूक्तम -4,

प्राजापत्य-काण्डम् -विषयः -याजमानम्,

। आ बभूव । बभूव सः । स प्र । प्र जज्ञे । जज्ञे सः । स वावृधे । वावृध इति वावृधे ॥ स देवानाँ । देवानामधिपतिः । अधिपतिर्बभूव । अधिपतिरित्यधि- पतिः । बभूव सः । सो अस्मान् । अस्माꣳ अधिपतीन् । अधिपतीन्करोतु । अधिपतीनित्यधिपतीन् । करोतु वयं । वयꣳ स्याम । स्याम पतयः । पतयो रयीणां । रयीणामिति रयीणां ॥ गोमाꣳ अग्ने । गोमानिति गो- मान् । अग्नेऽविमान् । अविमाꣳ अश्वी । अविमानित्यवि-मान् । अश्वी यज्ञः । यज्ञो नृवत्सखा । नृवत्सखा सदँ । नृवत्सखेति नृवत्-सखा । सदमित् । इदप्रमृष्यः । अप्रमृष्य इत्यप्र-मृष्यः । इडावाꣳ एषः । इडावानितीडाँ- वान् । एषो असुरः । असुर प्रजावान् । प्रजावाँन् दीर्घः । प्रजावानिति प्रजा-वान् । दीर्घो रयिः । रयिः पृथुबुध्नः । पृथुबुध्नः सभावान् । पृथुबुध्न इति पृथु-बुध्नः । सभावानिति सभा-वान् () ॥॥

काण्ड -1, प्रपाठक -6, अनुवाक -7, अनुवाक सूक्तम -1,

प्राजापत्य-काण्डम् -विषयः -याजमान-ब्राह्मणम्,

यथा वै । वै सꣳमृतसोमा । समृतसोमा एवं । समृतसोमा इतिꣳ समृत-सोमाः । एवं वै । वा एते । एते सꣳमृतयज्ञाः । समृतयज्ञा यत् । समृतयज्ञा इतिꣳ समृत-यज्ञाः । यद्दर्श्पूर्णमासौ । दर्श्पूर्णमासौ कस्यं । दर्श्पूर्णमासाविति दर्श्-पूर्णमासौ । कस्यं वा । वाहं । अहं देवाः । देवा यज्ञं । यज्ञमागच्छंति । आगच्छंति कस्यं । आगच्छंतीत्याँ-गच्छंति । कस्यं वा । वा न । न बंहूनां । बहूनां यजंमानानां । यजंमानानां यः । यो वै । वै देवताँः ॥ देवताः पूर्वः । पूर्वः परिगृह्णातिं । परिगृह्णाति सः । परिगृह्णातीतिं परि-गृह्णातिं ॥ स एंनाः । एनाः श्वः । श्वो भूते । भूते यंजते । यजत एतत् । एतद्वै । वै देवानाँ । देवानांमायतंनं । आयतंनं यत् । आयतंनमित्याँ-यतंनं । यदाहवनीयः । आहवनीयाँतरा । आहवनीय इत्याँ-हवनीयः । अंतराग्नी । अग्नी पंशूनां । अग्नी इत्यग्नी । पशूनां गार्हपत्यः । गार्हपत्यो मनुष्याणां । गार्हपत्य इति गार्ह-पत्यः । मनुष्याणामन्वाहार्यपचंनः । अन्वाहार्यपचंनः पितृणां । अन्वाहार्यपचंन इत्यंन्वाहार्य-पचंनः । पितृणामग्निं । अग्निं गृह्णाति । गृह्णाति स्वे । स्व एव । एवायतंने । आयतंने देवताँः । आयतंन इत्याँ-यतंने । देवताः परिं ()

काण्ड -1, प्रपाठक -6, अनुवाक -7, अनुवाक सूक्तम -2,

प्राजापत्य-काण्डम् -विषयः -याजमान-ब्राह्मणम्,

। परिं गृह्णाति । गृह्णाति ताः । ताः श्वः । श्वो भूते । भूते यंजते । यजते व्रतेनं । व्रतेन वै । वै मेध्यः । मेध्योऽग्निः । अग्निर्व्रतपंतिः । व्रतपंति ब्राह्मणः । व्रतपंतिरितिं व्रत-पतिः । ब्राह्मणो व्रंतभृत् । व्रतभृद्वतं । व्रतभृदितिं व्रत-भृत् । व्रतमुंपैष्यन् । उपैष्यन्ब्रूयात् । उपैष्यन्नित्युंप-एष्यन् । ब्रूयादग्नैं । अग्नैं व्रतपते । व्रतपते व्रतं । व्रतपत इतिं व्रत-पते । व्रतं चंरिष्यामि । चरिष्यामीतिं । इत्यग्निः । अग्निर्वै । वै देवानाँ । देवानाँ व्रतपंतिः । व्रतपंतिस्तस्मैं । व्रतपंतिरितिं व्रत-पतिः । तस्मां एव । एव प्रंतिप्रोच्यं । प्रतिप्रोच्यं व्रतं । प्रतिप्रोच्येतिं प्रति-प्रोच्यं । व्रत मा । आ लंभते । लभते बर्हिषाँ । बर्हिषां पूर्णमांसे । पूर्णमांसे व्रतं । पूर्णमांस इतिं पूर्ण-मासे । व्रतमुपं । उपैंति । एति वत्सैः ।

वत्सेरंमावास्यांयां । अमावास्यांयामेतत् । अमावास्यांयामित्यमा-वास्यांयां । एतद्वै । ह्येतयोः । एतयोरायतनं । आयतनंमुपस्तीर्यः । आयतनमित्याँ-यतनं । उपस्तीर्यः पूर्वः । उपस्तीर्य इत्युप-स्तीर्यः । पूर्वश्च । चाग्निः । अग्निरपरः । अपरश्च । चेतिं । इत्याहुः । आहुर्मनुष्याः ()

काण्ड -1, प्रपाठक -6, अनुवाक -7, अनुवाक सूक्तम -3,

प्राजापत्य-काण्डम् -विषयः -याजमान-ब्राह्मणम्,

। मनुष्या इत् । इन्नु । न्वै । वा उपस्तीर्णं । उपस्तीर्णमिच्छंति । उपस्तीर्णमित्युप -स्तीर्णं । इच्छंति किं । किमु । उदेवाः । देवा येषाँ । येषां नवावसानं । नवावसानमुप । नवावसानमितिनव-अवसानं । उपाँस्मिन् । अस्मिन्छ ः । श्वो यक्ष्यमाणे । यक्ष्यमाणे देवताः । देवता वसंति । वसंति यः । य एवं । एवं विद्वान् । विद्वानग्निं । अग्निमुपस्तृणाति । उपस्तृणाति यजमानेन । उपस्तृणातीत्युप-स्तृणाति । यजमानेन ग्राम्याः । ग्राम्याश्च । च पशवः । पशवोऽवरुध्याः । अवरुध्या आरण्याः । अवरुध्या इत्यव-रुध्याः । आरण्याश्च । चेतिं । इत्याहुः । आहुर्यत् । यद्ग्राम्यान् । ग्राम्यानुप वसंति । उपवसंति तेनं । उपवसतीत्युप-वसंति । तेनं ग्राम्यान् । ग्राम्यानवं । अवं रुंधे । रुंधे यत् । यदारण्यस्यं । आरण्यस्याश्नाति । अश्नाति तेनं । तेनारण्यान् । आरण्यान्, यत् । यदनाँश्वान् । अनाँश्वानुपवसैत् । उपवसैत्पितृदेवत्यः । उपवसेदित्युप-वसैत् । पितृदेवत्यः स्यात् । पितृदेवत्य इतिं पितृ-देवत्यः । स्यादारण्यस्यं । आरण्यस्याँश्नाति । अश्नातींद्रियं ()

काण्ड -1, प्रपाठक -6, अनुवाक -7, अनुवाक सूक्तम -4,

प्राजापत्य-काण्डम् -विषयः -याजमान-ब्राह्मणम्,

। इंद्रियं वै । वा आरण्यं । आरण्यमिंद्रियं । इंद्रियमेव । एवात्मन् । आत्मन्धत्ते । धत्ते यत् । यदनाँश्वान् । अनाँश्वानुपवसैत् । उपवसेत्क्षोधुंकः । उपवसेदित्युप- वसैत् । क्षोधुंकः स्यात् । स्याद्यत् । यदश्नीयात् । अश्नीयाद्रुद्रः ।

रुद्रौऽस्य । अस्य पशून् । पशूनभि । अभि मन्येत । मन्येतापः । अपौऽश्नाति । अश्नाति तत् । तन्न । नेवं । ह्वाशितं । अशित न्न । नेवं । ह्वानशितं । अनशितं न । न क्षोधुकः । क्षोधुको भवति । भवति न । नास्य । अस्य रुद्रः । रुद्रः पशून् । पशूनभि । अभि मन्यते । मन्यते वज्रः । वज्रो वै । वै यज्ञः । यज्ञः, क्षुत् । क्षुत्खलु । खलु वै । वै मनुष्यस्य । मनुष्यस्य भ्रातृव्यः । भ्रातृव्यो यत् । यदनाँश्वान् । अनाँश्वानुपवसति । उपवसति वज्रेण । उपवसतीत्युप-वसति । वज्रेणैव । एव साक्षात् । साक्षात्क्षुधं । साक्षादितिं स-अक्षात् । क्षुधं भ्रातृव्यं । भ्रातृव्यꣳ हंति । हंतीतिं हंति () ॥॥

काण्ड -1, प्रपाठक -6, अनुवाक -8, अनुवाक सूक्तम -1,

प्राजापत्य-काण्डम् -विषयः -याजमान-ब्राह्मणम्,

यो वै । वै श्रद्धां । श्रद्धामनारभ्य । श्रद्धामितिं श्रत्-धां । अनारभ्य यज्ञेनं । अनारभ्येत्यनाँ-रभ्य । यज्ञेन यजते । यजते न । नास्यं । अस्येष्टायं । इष्टाय श्रत् । श्रद्दधते । दधतेऽपः । अपः प्र । प्रणयति । नयति श्रद्धा । श्रद्धा वै । श्रद्धेतिं श्रत्-धा । वा आपः । आपः श्रद्धाम् । श्रद्धामेव । श्रद्धामितिं श्रत्-धाम् । एवारभ्यं । आरभ्यं यज्ञेनं । आरभ्येत्याँ-रभ्यं । यज्ञेनं यजते । यजत उभयैँ । उभयैँऽस्य । अस्य देवमनुष्याः । देवमनुष्या इष्टायं । देवमनुष्या इतिं देव-मनुष्याः । इष्टाय श्रत् । श्रद्दधते । दधते तत् । तदाहुः । आहुरतिं । अति वै । वा एताः । एता वर्त्रैं । वर्त्रं नेदंति । नेदंत्यतिं । अति वाचँ । वाचं मनः । मनो वाव । वावैताः । एता न । नातिं । अतिं नेदंति । नेदंतीतिं । इति मनसा । मनसा प्र । प्रणयति । नयतीयं । इयं वै । वै मनः ()

काण्ड -1, प्रपाठक -6, अनुवाक -8, अनुवाक सूक्तम -2,

प्राजापत्य-काण्डम् -विषयः -याजमान-ब्राह्मणम्,

। मनोऽनयाँ । अनयैव । एवैनाँः । एनाः प्र । प्रणयति । नयत्यस्कन्नहविः । अस्कन्नहविर्भवति । अस्कन्नहविरित्यस्कन्न-हविः । भवति यः । य एवं । एवं वेदं । वेदं यज्ञायुधानिं । यज्ञायुधानि सं । यज्ञायुधानीतिं यज्ञ-आयुधानिं । संभरति । भरति यज्ञः । यज्ञो वै । वै यज्ञायुधानिं । यज्ञायुधानिं यज्ञं । यज्ञायुधानीतिं यज्ञ-आयुधानिं । यज्ञमेव । एव तत् । तथ्सं । संभरति । भरति यत् । यदेकमेकं । एकमेकꣳ संभरेँत् । एकमेकमित्येकँ-एकं । संभरेँत्पितृदेवत्यानि । संभरेदितिं- सं-भरेँत् । पितृदेवत्यानि स्युः । पितृदेवत्यानीतिं पितृ-देवत्यानि । स्युर्यत् । यत्सह । सह सर्वाणि । सर्वाणि मानुषाणिं । मानुषाणि द्वे द्वे । द्वे द्वे सं । द्वे द्वे इति द्वे-द्वे । संभरति । भरति याज्यानुवाक्ययोः । याज्यानुवाक्ययोरेव । याज्यानुवाक्ययोरितिं याज्या-अनुवाक्ययोः । एव रूपं । रूपं करोति । करोत्यथौ । अथो मिथुनं । अथो इत्यथौ । मिथुनमेव । एव यः । यो वै । वै दर्शं । दर्शं यज्ञायुधानिं । यज्ञायुधानि वेदं । यज्ञायुधानीतिं यज्ञ-आयुधानिं । वेदमुखतः । मुखतौऽस्य । अस्य यज्ञः । यज्ञः कल्पते । कल्पते स्फ्यः । स्फ्यश्च । ()

काण्ड -1, प्रपाठक -6, अनुवाक -8, अनुवाक सूक्तम -3,

प्राजापत्य-काण्डम् -विषयः -याजमान-ब्राह्मणम्,

च कपालानि । कपालानि च । चाग्निहोत्र हवणी । अग्निहोत्रहवणी च । अग्निहोत्रहवणीत्यग्निहोत्र-हवनी । च शूर्पं । शूर्पं च । च कृष्णाजिनं । कृष्णाजिनं चं । कृष्णाजिनमितिं कृष्ण-अजिनं । च शम्याँ । शम्या च । चोलूखलं । उलूखलं च । च मुसलं । मुसलं च । च दृषत् । दृषच्च । चोपला । उपला च । चैतानिं । एतानि वै । वै दर्शं । दर्शयज्ञायुधानिं । यज्ञायुधानि यः । यज्ञायुधानीतिं यज्ञ-आयुधानिं । य एवं । एवं वेदं । वेदं मुखतः । मुखतौऽस्य । अस्य यज्ञः । यज्ञः कल्पते । कल्पते यः । यो वै । वै देवेभ्यः । देवेभ्यः पतिप्रोच्यं । प्रतिप्रोच्यं यज्ञेनं । प्रतिप्रोच्येतिं प्रति-प्रोच्यं । यज्ञेन यजते । यजते जुषतैँ । जुषतैँऽस्य । अस्य देवाः । देवा हव्यं । हव्यꣳ हविः । हविर्निरुप्यमाणं ।

नि॒रु॒प्यमा॑णम॒भि । नि॒रु॒प्यमा॑ण॒मिति॑ निः-उ॒प्यमा॑नं । अ॒भिम॑न्त्रयेत । म॒न्त्र॒येता॒ग्निं । अ॒ग्निꣳ होता॑रं । होता॑रमि॒ह । इ॒ह तं । तꣳ हु॑वे । हु॒व॒ इति॑ ()

काण्ड -1, प्रपाठक -6, अनुवाक -8, अनुवाक सूक्तम -4,

प्राजापत्य-काण्डम् -विषयः -याजमान-ब्राह्मणम्,

। इति॑ दे॒वेभ्यः॑ । दे॒वेभ्य॑ एव । एव प्र॑तिप्रोच्यं । प्र॒ति॒प्रोच्य॑ यज्ञेनं । प्र॒ति॒प्रोच्ये॑ति॑ प्रति-प्रोच्य॑ । य॒ज्ञेन॑ यजते । य॒जते॑ जुषंतै॑ । जु॒षंतै॑ऽस्य । अ॒स्य दे॒वाः॑ । दे॒वा ह॒व्यं । ह॒व्यमे॒षः । ए॒ष वै । वै य॒ज्ञस्य॑ । य॒ज्ञस्य॒ ग्रहः॑ । ग्रहो॑ गृही॒त्वा । गृ॒ही॒त्वैव । एव य॒ज्ञेन॑ । य॒ज्ञेन॑ यजते । य॒जते॑ तत् । तदु॑दि॒त्वा । उ॒दि॒त्वा वाच॑ँ । वाच॑ यच्छति । य॒च्छति॒ य॒ज्ञस्य॑ । य॒ज्ञस्य॑ धृत्यै॑ । धृ॒त्या॒ अथौ॑ । अथो॒ मन॑सा । अथो॒ इत्यथौ॑ । मन॑सा॒ वै । वै प्र॒जाप॑तिः । प्र॒जाप॑तिर्य॒ज्ञं । प्र॒जाप॑ति॒रिति॑ प्र॒जा-प॒तिः॒ । य॒ज्ञम॑तनुत । अ॒त॒नु॒त॒ मन॑सा । मन॑सै॒व । एव तत् । तद्य॒ज्ञं । य॒ज्ञं त॑नुते । त॒नु॒ते॒ रक्ष॑सां । रक्ष॑सा॒मन॑न्ववचाराय । अन॑न्ववचाराय॒ यः । अन॑न्ववचारा॒येत्यन॑नु-अ॒व॒चा॒राय॒ । यो वै । वै य॒ज्ञं । य॒ज्ञं योगै॑ । योग॒ आग॑ते । आग॑ते युनक्ति॑ । आग॑त॒ इत्या-ग॒ते॒ । यु॒नक्ति॑ युङ्क्ते । युङ्क्ते यु॑ंजा॒नेषु॑ । यु॒ंजा॒नेषु॒ कः । कस्वा॑ँ । वा॒ युनक्ति । यु॒नक्ति॒ सः । स वा॑ँ । वा॒ युनक्तु । यु॒नक्ति॑ति॑ । इत्या॑ह । आ॒ह॒ प्र॒जाप॑तिः । प्र॒जाप॑ति॒र्वै । प्र॒जाप॑ति॒रिति॑ प्र॒जा-प॒तिः॒ । वै कः । कः प्र॒जाप॑तिना । प्र॒जाप॑ति॒नैव । प्र॒जाप॑ति॒नेति॑ प्र॒जा-प॒ति॒ना॒ । ए॒वैन॑ँ । एन॑ं युनक्ति । यु॒नक्ति॑ युङ्क्ते । युङ्क्ते यु॑ंजा॒नेषु॑ । यु॒ंजा॒नेष्वि॑ति॑ युंजा॒नेषु॑ () ॥॥

काण्ड -1, प्रपाठक -6, अनुवाक -9, अनुवाक सूक्तम -1,

प्राजापत्य-काण्डम् -विषयः -याजमान-ब्राह्मणम्,

प्र॒जाप॑तिर्य॒ज्ञान् । प्र॒जाप॑ति॒रिति॑ प्र॒जा-प॒तिः॒ । य॒ज्ञान॑सृजत । अ॒सृ॒ज॒ताग्निहो॑त्रं । अ॒ग्निहो॑त्रं च॑ । अ॒ग्निहो॑त्रमि॒त्य॒ग्नि-हो॒त्रं । चा॒ग्निष्टो॑मं । अ॒ग्निष्टो॑मं च॑ । अ॒ग्निष्टो॑ममि॒त्य॒ग्नि-स्तो॒मम् । च॒ पौ॒र्ण॒मा॒सीं । पौ॒र्ण॒मा॒सीं च॑ । पौ॒र्ण॒मा॒सीमिति॑ पौर्ण-मा॒सीं

। चोक्थ्यँ । उक्थ्यं च । चामावास्याँ । अमावास्याँ च । अमावास्यामित्यमा-वास्याँ । चातिरात्रं । अतिरात्रं च । अतिरात्रमित्यति-रात्रं । च तान् । तानुत् । उदमिमात । अमिविरिति यावत् । यावदग्निहोत्रं । अग्निहोत्रमासीँत् । अग्निहोत्रमित्यग्नि-होत्रं । आसीत्तावान् । तावानग्निष्टोमः । अग्निष्टोमो यावती । अग्निष्टोम इत्यग्नि-स्तोमः । यावती पौर्णमासी । पौर्णमासी तावान् । पौर्णमासीति पौर्ण-मासी । तावानुक्थ्यः । उक्थ्यो यावती । यावत्यमावास्याँ । अमावास्या तावान् । अमावास्येत्यमा-वास्याँ । तावानतिरात्रः । अतिरात्रो यः । अतिरात्र इत्यति-रात्रः । य एवं । एवं विद्वान् । विद्वानग्निहोत्रं । अग्निहोत्रं जुहोति । अग्निहोत्रमित्यग्नि-होत्रं । जुहोति यावत् । यावदग्निष्टोमेनं । अग्निष्टोमेनोपाप्नोति । अग्निष्टोमेनेत्यग्नि-स्तोमेनं । उपाप्नोति तावत् । उपाप्नोतीत्युप-आप्नोति । तावदुपँ । उपाँप्नोति । आप्नोति यः । य एवं । एवं विद्वान् । विद्वान्पौर्णमासीं । पौर्णमासीं यजते । पौर्णमासीमिति पौर्ण-मासीम् । यजते यावत् । यावदुक्थ्येन । उक्थ्येनोपाप्नोति । उपाप्नोति तावत् । उपाप्नोतीत्युप-आप्नोति ()

काण्ड -1, प्रपाठक -6, अनुवाक -9, अनुवाक सूक्तम -2,

प्राजापत्य-काण्डम् -विषयः -याजमान-ब्राह्मणम्,

तावदुपँ । उपाँप्नोति । आप्नोति यः । य एवं । एवं विद्वान् । विद्वानमावास्याँ । अमावास्याँ यजते । अमावास्यामित्यमा-वास्याँ । यजते यावत् । यावदतिरात्रेण । अतिरात्रेणोपाप्नोति । अतिरात्रेणेत्यति-रात्रेण । उपाप्नोति तावत् । उपाप्नोतीत्युप-आप्नोति । तावदुपँ । उपाँप्नोति । आप्नोति परमेष्ठिनः । परमेष्ठिनो वै । वा एषः । एष यज्ञः । यज्ञोग्रैँ । अग्र आसीत् । आसीत्तेन । तेन सः । स परमां । परमां काष्ठाँ । काष्ठामगच्छत् । अगच्छत्तेन । तेन प्रजापतिं । प्रजापतिं निरवासाययत् । प्रजापतिमिति प्रजा-पतिं । निरवासाययत्तेन । निरवासाययदिति निः-अवासाययत् । तेन प्रजापतिः । प्रजापतिः परमां । प्रजापतिरिति प्रजा-पतिः । परमां काष्ठाँ । काष्ठामगच्छत् । अगच्छत्तेन । तेनेंद्रँ । इंद्रं निरवासाययत् । निरवासाय यत्तेन । निरवासाययदिति निः-अवासाययत् । तेनेंद्रः । इंद्रः परमां । परमां काष्ठाँ । काष्ठामगच्छत् । अगच्छत्तेन । तेनाग्नीषोमौँ । अग्नीषोमौं निरवासाययत् । अग्नीषोमावित्यग्नी-सोमौँ ।

नि॒रवा॑सायय॒त्तेन॑ । नि॒रवा॑सायय॒दिति॑ निः-अवा॑सायय॒त् । तेना॒ग्नीषोमौ॑ । अ॒ग्नीषोमौ॑ पर॒मां । अ॒ग्नीषोमा॒वित्य॒ग्नी-सोमौ॑ । प॒र॒मां काष्ठा॑म् । काष्ठा॑मगच्छतां । अ॒ग॒च्छ॒तां॒ यः ()

काण्ड -1, प्रपाठक -6, अनुवाक -9, अनुवाक सूक्तम -3,

प्राजापत्य-काण्डम् -विषयः -याजमान-ब्राह्मणम्,

। य ए॒वं । ए॒वं वि॒द्वान् । वि॒द्वान्दर्॒र्शपूर्णमा॒सौ । द॒र्॒श॒पूर्ण-मा॒सौ यज॑तेद॒र्॒श॒पूर्ण॒र्॒सावितिं॑ दर्॒श पूर्णमा॒सौ यज॑ते पर॒मां । प॒र॒मामे॒व । ए॒व काष्ठा॑म् । काष्ठा॑म् गच्छति । ग॒च्छ॒ति॒ यः । यो वै । वै प्रजा॑तेन । प॑जातेन य॒ज्ञेन॑ । प्रजा॑तेनेति॒ प्र-जा॒ते॒न॒ । य॒ज्ञेन॒ यज॑ते । यज॑ते॒ प्र । प्र प्र॒जया॑म् । प्र॒जया॑ प॒शुभिः॑ । प्र॒जये॑ति॒ प्र-ज॒या॒म् । प॒शुभि॑र्मिथु॒नैः । प॒शुभि॒रिति॑ प॒शु-भि॒रि॒ । मि॒थु॒नैर्जा॑यते । जा॒य॒ते द्वाद॑श । द्वाद॑श मासा॑म् । मासा॑ꣳ संवथ्स॒रः । स॒ंव॒थ्स॒रो द्वाद॑श । स॒ंव॒थ्स॒र इति॑ सं-व॒थ्स॒रः । द्वाद॑श द्वंद्वानि॑ । द्वंद्वानि॑ दर्॒श्पूर्णमासयो॑म् । द्वंद्वानी॑ति॒ द्वं-द्वानि॑ । द॒र्॒?र्शपूर्णमासयो॒स्तानि॑ । द॒र्॒श॒पूर्णमासयो॒रिति॑ दर्॒श-पूर्णमासयो॑म् । तानि॑ स॒ंपाद्या॑नि । स॒ंपाद्या॑नी॒ति॒ । स॒ंपाद्या॑नी॒ति॒ सं-पाद्या॑नि । इ॒त्या॑हुः । आ॒हु॒र्व॒त्स॑म् । व॒त्स॑म् च॑ । चो॒पा॒व॒सृ॒ज॒ति॒ । उ॒पा॒व॒सृ॒ज॒त्यु॒खा॑म् । उ॒पा॒व॒सृ॒ज॒तीत्यु॑प-अ॒व॒सृ॒ज॒ति॒ । उ॒खा॑म् च॑ । चाधि॑ । अधि॑ श्रयति । श्र॒य॒त्यव॑ । अव॑ च । च॒ ह॑ति॒ । ह॑ति॒ दृ॒षदौ॑ । दृ॒षदौ॑ च । च॒ स॒माह॑ति । स॒माह॑त्यधि॑ । स॒माह॑तीति॑ सं-आह॑ति । अधि॑ च । च॒ वप॑ते । वप॑ते क॒पाला॑नि । क॒पाला॑नि च । चोप॑ । उप॑ दधाति । द॒धा॒ति॒ पुरो॒डाश॑म् । पुरो॒डाश॑ꣳ च ()

काण्ड -1, प्रपाठक -6, अनुवाक -9, अनुवाक सूक्तम -4,

प्राजापत्य-काण्डम् -विषयः -याजमान-ब्राह्मणम्,

। चाधि॒श्र॒य॒ति । अधि॒श्र॒य॒त्याज्य॑म् । अधि॒श्र॒य॒तीत्यधि-श्र॒य॒ति । आज्य॑ च । च॒ स्तं॒ब॒य॒जुः । स्तं॒ब॒य॒जुश्च॑ । स्तं॒ब॒य॒जुरिति॑ स्तंब-य॒जुः॒ । च॒ ह॒र॑ति । ह॒र॑त्यभि । अभि च॑ । च॒ गृ॒ह्णा॒ति॒ । गृ॒ह्णा॒ति॒ वेदि॑म् । वेदि॑ च । च॒ परि॒गृ॒ह्णा॒ति॒ । परि॒गृ॒ह्णा॒ति॒

पत्नीँ॑ । परि॑गृह्णातीति॑ परि-गृह्णाति॑ । पत्नीँ॑ च । च॒ सं । सं न॑ह्यति । न॒ह्य॒ति॒ प्रोक्षणीः॑ । प्रोक्षणीश्च । प्रोक्षणी॑रिति॑ प्र-उक्षणीः॑ । चा॒सा॒द॒य॒ति॒ । आ॒सा॒द॒य॒त्याज्य॑म् । आ॒सा॒द॒य॒तीत्या॑-सादयति । आज्यं॑ च । चै॒तानि॑ । ए॒तानि॒ वै । वै द्वादश । द्वादश द्व॑न्द्वानि॑ । द्व॒न्द्वानि॑ दर्श॒पूर्ण॑मासयोः॑ । द्व॒न्द्वानी॑ति॑द्वं-द्वानि॑ । दर्?शपूर्णमासयोस्तानि॑ । दर्श॒पूर्ण॒मा॒स॒यो॒रि॒ति॑ दर्श-पूर्ण-मा॒स॒यो॒ः॑ । तानि॒ यः । य ए॒वं । ए॒व॒ꣳ सं॒पाद्य॑ । सं॒पाद्य॑ यज॑ते । सं॒पाद्ये॑ति॑ सं-पाद्य॑ । यज॑ते॒ प्रजा॑तेन । प्रजा॑तेने॒व । प्रजा॑तेने॒ति॒ प्र-जा॒ते॒न॒ । ए॒व य॒ज्ञेन॑ । य॒ज्ञेन॑ यजते । य॒ज॒ते॒ प्र । प्र प्र॒जया॑ । प्र॒जया॑ प॒शुभिः॑ । प्र॒जये॑ति॑ प्र-जया॑ । प॒शुभि॑र्मिथु॒नैः॑ । प॒शुभि॒रिति॑ प॒शु-भिः॑ । मि॒थु॒नै- र्जा॑यते । जा॒य॒त॒ इति॑ जायते () ॥॥

काण्ड -1, प्रपाठक -6, अनुवाक -10, अनुवाक सूक्तम -1,

प्राजापत्य-काण्डम् -विषयः -याजमान-ब्राह्मणम्,

ध्रु॒वोऽसि । अ॒सि॒ ध्रु॒वः । ध्रु॒वोऽहं । अ॒ह॒ꣳ सं॒जा॒तेषु॑ । स॒जा॒तेषु॑ भूयासं । स॒जा॒तेष्वि॑ति॑ स-जा॒तेषु॑ । भू॒या॒स॒मि॑ति॑ । इ॒त्या॑ह । आ॒ह॒ ध्रु॒वान् । ध्रु॒वान्॑व । ए॒वैना॑न्न् । ए॒नान् कु॑रुते । कु॒रु॒त॒ उ॒ग्रः । उ॒ग्रोऽसि । अ॒स्यु॒ग्रः । उ॒ग्रोऽहं । अ॒ह॒ꣳ सं॒जा॒तेषु॑ । स॒जा॒तेषु॑ भूयासं । स॒जा॒तेष्वि॑ति॑ स-जा॒तेषु॑ । भू॒या॒स॒मि॑ति॑ । इ॒त्या॑ह । आ॒हा॒प्र॑तिवादिनः । अप्र॑तिवादिन ए॒व । अप्र॑तिवादि॒न॒ इत्यप्र॑ति-वादि॒नः॑ । ए॒वैना॑न्न् । ए॒नान् कु॑रुते । कु॒रु॒तेऽभि॒भूः॑ । अ॒भि॒ भूर॑सि । अ॒भि॒भूरि॒त्य॑भि-भूः॑ । अ॒स्य॒भि॒ भूः॑ । अ॒भी॒भूर॒हं । अ॒भि॒भूरि॒त्य॑भि-भूः॑ । अ॒ह॒ꣳ सं॒जा॒तेषु॑ । स॒जा॒तेषु॑ भूयासं । स॒जा॒तेष्वि॑ति॑ स-जा॒तेषु॑ । भू॒या॒स॒मि॑ति॑ । इ॒त्या॑ह । आ॒ह॒ यः । य ए॒व । ए॒वैन॑म् । ए॒न॒ꣳ प्र॒त्यु॒त्पि॒पे॒ते । प्र॒त्यु॒त्पि॒पी॑ते॒ तम् । प॒त्यु॒त्पि॒पी॑त॒ इति॑ प्रति-उ॒त्पि॒पी॑ते । तमुप॑ । उपा॑स्यते । अ॒स्य॒ते॒ यु॒नज्मि॑ । यु॒नज्मि॑ ब्रा । ब्रा ब्रह्म॑णा । ब्रह्म॑णा दैव्ये॑न । दैव्ये॑नेति॑ । इ॒त्या॑ह । आ॒हे॒षः । ए॒ष वै । वा अ॒ग्नेः । अ॒ग्नेर्योगः॑ । योग॒स्तेन॑ ()

काण्ड -1, प्रपाठक -6, अनुवाक -10, अनुवाक सूक्तम -2,

प्राजापत्य-काण्डम् -विषयः -याजमान-ब्राह्मणम्,

। तेनैव । एवैनँ । एनं युनक्ति । युनक्ति यज्ञस्यं । यज्ञस्य वै । वै समृद्धेन । समृद्धेन देवाः । समृद्धेनेति सं-ऋद्धेन । देवाः सुवर्गं । सुवर्गं लोकं । सुवर्गमिति सुवः-गं । लोकमायन्न् । आयन्, यज्ञस्यं । यज्ञस्य व्यृद्धेन । व्यृद्धेनासुरान् । व्यृद्धेनेति वि-ऋद्धेन । असुरान् परा$ । पराभावयन् । अभावयन्, यत् । यन्मै$ । मे अग्ने । अग्ने अस्य । अस्य यज्ञस्यं । यज्ञस्य रिष्या$त् । रिष्यादिति । इत्याह । आह यज्ञस्यं । यज्ञस्यैव । एव तत् । तत्समृद्धेन । समृद्धेन यजमानः । समृद्धेनेति सं-ऋद्धेन । यजमानः सुवर्गं । सुवर्गं लोकं । सुवर्गमिति सुवः-गं । लोकमेति । एति यज्ञस्यं । यज्ञस्य व्यृद्धेन । व्यृद्धेन भ्रातृव्यान् । व्यृद्धेनेति वि-ऋद्धेन । भ्रातृव्यान् परा$। । परा भावयति । भावयत्यग्नि होत्रं । अग्निहोत्रमेताभिः । अग्निहोत्रमित्यग्नि-होत्रं । एताभिर्व्याहृतीभिः । व्याहृतीभिरुपं । व्याहृतीभिरिति व्याहृति-भिः । उपसादयेत् । सादयेद्यज्ञमुखं । यज्ञमुखं वै । यज्ञमुखमिति यज्ञ-मुखं । वा अग्निहोत्रं । अग्निहोत्रं ब्रह्म । अग्निहोत्रमित्यग्नि-होत्रं । ब्रह्मैताः। । एता व्याहृतयः । व्याहृतयो यज्ञमुखे । व्याहृतय इति वि-आहृतयः । यज्ञमुख एव । यज्ञमुख इति यज्ञ-मुखे । एव ब्रह्म ()

काण्ड -1, प्रपाठक -6, अनुवाक -10, अनुवाक सूक्तम -3,

प्राजापत्य-काण्डम् -विषयः -याजमान-ब्राह्मणम्,

। ब्रह्म कुरुते । कुरुते संवथ्सरे । संवथ्सरे पर्यागते । संवथ्सर इति सं-वथ्सरे । पर्यागत एताभिः । पर्यागत इति परि-आगते । एताभिरेव । एवोप । उपसादयेत् । सादयेद्ब्रह्मणा । ब्रह्मणैव । एवोभयतः । उभयतः संवथ्सरं । संवथ्सरं परि । संवथ्सरमिति सं- वथ्सरं । परि गृह्णाति । गृह्णाति दर्?शपूर्णमासौ । दर्?शपूर्णमासौ चातुर्मास्यानि । दर्शपूर्णमासाविति दर्श-पूर्णमासौ । चातुर्मास्या-न्यालभमानः । चातुर्मास्यानीति चातुः-मास्यानि । आलभमान एताभिः । आलभमान इत्या$-लभमानः । एताभिर्व्याहृतीभिः । व्याहृतीभिर् हवीꣳषि । व्याहृतीभिरिति व्याहृति-भिः । हवीꣳष्या । आसादयेत् । सादयेद्यज्ञमुखं । यज्ञमुखं वै । यज्ञमुखमिति यज्ञ-मुखं । वै दर्श्पूर्णमासौ । दर्?शपूर्णमासौ चातुर्मास्यानि । दर्श्पूर्णमासाविति दर्श्-पूर्णमासौ । चातुर्मास्यानि ब्रह्म । चातुर्मास्यानीति चातुः-मास्यानि । ब्रह्मैताः ।

एता व्याहृतयः । व्याहृतयो यज्ञमुखे । व्याहृतय इति वि-आहृतयः । यज्ञमुख एव । यज्ञमुख इति यज्ञ-मुखे । एव ब्रह्म । ब्रह्म कुरुते । कुरुते संवथ्सरे । संवथ्सरे पर्यागते । संवथ्सर इति सं-वत्सरे । पर्यागत एताभिः । पर्यागत इति परि-आगते । एताभिरेव । एवा । आ सादयेत् । सादयेद्ब्रह्मणा । ब्रह्मणैव । एवोभयतः । उभयतः संवथ्सरं । संवथ्सरं परि । संवथ्सरमिति सं-वथ्सरं । परि गृह्णाति । गृह्णाति यत् । यद्वै । वै यज्ञस्य । यज्ञस्य साम्नाँ । साम्नाँ क्रियते । क्रियते राष्ट्रं ()

काण्ड -1, प्रपाठक -6, अनुवाक -10, अनुवाक सूक्तम -4,

प्राजापत्य-काण्डम् -विषयः -याजमान-ब्राह्मणम्,

। राष्ट्रं यज्ञस्य । यज्ञस्याशीः । आशीर्गच्छति । आशीरित्याँ-शीः । गच्छति यत् । यदृचा । ऋचा विशँ । विश यज्ञस्य । यज्ञस्याशीः । आशीर्गच्छति । आशीरित्याँ-शीः । गच्छत्यथ । अथ ब्राह्मणः । ब्राह्मणोऽनाशीर्केण । अनाशीर्केण यज्ञेन । यज्ञेन यजते । यजते सामिधेनीः । सामिधेनीरनुवक्ष्यन् । सामिधेनीरिति सां-इधेनीः । अनुवक्ष्यन्नेताः । अनुवक्ष्यन्नित्यनु-वक्ष्यन् । एता व्याहृतीः । व्याहृतीः पुरस्ताँत् । व्याहृतीरिति वि-आहृतीः । पुरस्ताँद्दध्यात् । दध्याद्ब्रह्म । ब्रह्मैव । एव प्रतिपदँ । प्रतिपद कुरुते । प्रतिपदमिति प्रति-पदँ । कुरुते तथाँ । तथाँ ब्राह्मणः । ब्राह्मणः साशीर्केण । साशीर्केण यज्ञेन । साशीर्केणेति स-आशीर्केण । यज्ञेन यजते । यजते यं । यं कामयेत । कामयेत यजमानं । यजमानं भातृव्यं । भ्रातृव्यमस्य । अस्य यज्ञस्य । यज्ञस्याशीः । आशीर्गच्छेत् । आशीरित्याँ-शीः । गच्छेदिति । इति तस्य । तस्यैताः । एता व्याहृतीः । व्याहृतीः पुरोनुवाक्यायां । व्याहृतीरिति वि-आहृतीः । पुरोनुवाक्यायां दध्यात् । पुरोनुवाक्यायामिति पुरः-अनुवाक्यायाम् । दध्याद्भातृव्य देवत्याँ । भ्रातृव्यदेवत्या वै । भ्रातृव्यदेवत्येति भ्रातृव्य-देवत्याँ । वै पुरोनुवाक्याँ । पुरोनुवाक्याँ भ्रातृव्यं । पुरोनुवाक्येति पुरः-अनुवाक्याँ । भ्रातृव्यमेव । एवास्य । अस्य यज्ञस्य ()

काण्ड -1, प्रपाठक -6, अनुवाक -10, अनुवाक सूक्तम -5,

प्राजापत्य-काण्डम् -विषयः -याजमान-ब्राह्मणम्,

। यज्ञस्याशीः । आशीर्गच्छति । आशीरित्या-शीः । गच्छति यान् । यान्कामयेत । कामयेत यजमानान् । यजमानान्थ्समावती । समावत्येनान् । एनान्, यज्ञस्य । यज्ञस्याशीः । आशीर्गच्छेत् । आशीरित्या-शीः । गच्छेदिति । इति तेषा । तेषामेताः । एता व्याहृतीः । व्याहृतीः पुरोनुवाक्यायाः । व्याहृतीरिति वि-आहृतीः । पुरोनुवाक्याया अर्धर्चे । पुरोनुवाक्याया इति पुरः-अनुवाक्यायाः । अर्धर्च एका । अर्धर्च इत्यर्ध-ऋचे । एका दध्यात् । दध्याद्याज्यायै । याज्यायै पुरस्ता्त् । पुरस्तादेका । एका याज्यायाः । याज्याया अर्धर्चे । अर्धर्च एका । अर्धर्च इत्यर्ध-ऋचे । एकां तथा । तथैनान् । एनान्थ्समावती । समावती यज्ञस्य । यज्ञस्याशीः । आशीर्गच्छति । आशीरित्या-शीः । गच्छति यथा । यथा वै । वै पर्जन्यः । पर्जन्यः सुवृष्टं । सुवृष्टं वर्षति । सुवृष्टमिति सु-वृष्टं । वर्षत्येवं । एवं यज्ञः । यज्ञो यजमानाय । यजमानाय वर्षति । वर्षति स्थलया । स्थलयोदकं । उदकं परि- गृह्णति । परिगृह्णन्त्याशिषा । परिगृह्णन्तीति परि-गृह्णति । आशिषा यज्ञं । आशिषेत्या-शिषा । यज्ञं यजमानः । यजमानः परि । परि गृह्णाति । गृह्णाति मनः । मनोऽसि । असि प्राजापत्यं । प्राजापत्यं मनसा । प्राजापत्यमिति प्राजा-पत्यं ()

काण्ड -1, प्रपाठक -6, अनुवाक -10, अनुवाक सूक्तम -6,

प्राजापत्य-काण्डम् -विषयः -याजमान-ब्राह्मणम्,

। मनसा मा । मा भूतेन । भूतेना । आविश । विशेति । इत्याह । आह मनः । मनो वै । वै प्राजापत्यं । प्राजापत्यं प्राजापत्यः । प्राजापत्यमिति प्राजा-पत्यं । प्राजापत्यो यज्ञः । प्राजापत्य इति प्राजा-पत्यः । यज्ञो मनः । मन एव । एव यज्ञं । यज्ञमात्मन् । आत्मन त्ते । धत्ते वाक् । वागसि । अस्येंद्री । ऐंद्री सपत्नक्षयणी । सपत्नक्षयणी वाचा । सपत्नक्षयणीति सपत्न-क्षयणी । वाचा मा । मेंद्रियेण । इंद्रियेणा । आ विश । विशेति । इत्याह । आहेंद्री । ऐंद्री वै । वै वाक् । वाग्वाचै । वाचमेव । एवेंद्रीं । ऐंद्रीमात्मन् । आत्मन्धत्ते । धत्त इति धत्ते () ॥॥

काण्ड -1, प्रपाठक -6, अनुवाक -11, अनुवाक सूक्तम -1,

प्राजापत्य-काण्डम् -विषयः -याजमान-ब्राह्मणम्,

यो वै । वै सं॑प्तद॒शं । स॒प्त॒द॒शं प्र॒जाप॑तिं । स॒प्त॒द॒शमिति॑ सप्त-द॒शं । प्र॒जाप॑तिं य॒ज्ञं । प्र॒जाप॑तिमिति॑ प्र॒जा-प॒तिं । य॒ज्ञम॒न्वाय॑त्तं । अ॒न्वाय॑त्तं वेद॑ ॥ अ॒न्वाय॑त्तमित्य॑नु-आय॑त्तम् । वेद॒ प्रति॑ । प्रति॑ य॒ज्ञेनं । य॒ज्ञेनं तिष्ठति । ति॒ष्ठ॒ति॒ न ॥ न य॒ज्ञात् । य॒ज्ञाद्भ्र॑श्यते । भ्र॒श्य॒त॒ आ । आ श्रा॑वय । श्रा॒व॒येति॑ । इति॒ चतु॑रक्षरं । चतु॑रक्षर॒मस्तु॑ । चतु॑रक्षर॒मिति॒ चतुः॑-अ॒क्ष॒रं । अ॒स्तु श्रौष॑ट् । श्रौष॒डिति॑ । इति॒ चतु॑रक्षरं । चतु॑रक्षरं यज॑ । चतु॑रक्षर॒मिति॒ चतुः॑-अ॒क्ष॒रं । यजे॑ति॑ । इति॒ द्व्य॑क्षरं । द्व्य॑क्षरं ये । द्व्य॑क्षर॒मिति॒ द्वि - अ॒क्ष॒रं । ये यजा॑महे । यजा॑महे॒ इति॑ । इति॒ पंचा॑क्षरं । पंचा॑क्षरं॒ द्व्य॑क्षरः । पंचा॑क्षर॒मिति॒ पंच॑-अ॒क्ष॒रं । द्व्य॑क्षरो व॑षट्का॒रः । द्व्य॑क्षर॒ इति॑ द्वि-अ॒क्ष॒रः । व॒ष॒ट्का॒र एषः । व॒ष॒ट्का॒र इति॑ वषट्-का॒रः । एष वै । वै सं॑प्तद॒शः । स॒प्त॒द॒शः प्र॒जाप॑तिः । स॒प्त॒द॒श इति॑ सप्त-द॒शः । प्र॒जाप॑तिर्य॒ज्ञं । प्र॒जाप॑तिरिति॑ प्र॒जा-प॒तिः । य॒ज्ञम॒न्वाय॑त्तः । अ॒न्वाय॑त्तो यः । अ॒न्वाय॑त्त इत्य॑नु-आय॑त्तः । य एवं । एवं वेद॑ । वेद॒ प्रति॑ । प्रति॑ य॒ज्ञेनं । य॒ज्ञेनं तिष्ठति । ति॒ष्ठ॒ति॒ न । न य॒ज्ञात् । य॒ज्ञाद्भ्र॑श्यते । भ्र॒श्य॒ते यः । यो वै । वै य॒ज्ञस्य॑ । य॒ज्ञस्य॒ प्राय॑णं । प्राय॑णं प्रतिष्ठां । प्राय॑ण॒मिति॑ प्र-अय॑नं । प्र॒ति॒ष्ठाम॒दय॑नं । प्र॒ति॒ष्ठामिति॑ प्रति-स्थां ()

काण्ड -1, प्रपाठक -6, अनुवाक -11, अनुवाक सूक्तम -2,

प्राजापत्य-काण्डम् -विषयः -याजमान-ब्राह्मणम्,

। उ॒दय॑नं वेद॑ । उ॒दय॑न॒मित्यु॒त्-अय॑नं । वेद॒ प्रति॑ष्ठितेन । प्रति॑ष्ठि॒तेनारि॑ष्टेन । प्रति॑ष्ठि॒तेनेति॒ प्रति॑-स्थि॒तेन॒ । अरि॑ष्टेन य॒ज्ञेनं । य॒ज्ञेनं स॒ꣳस्थां । स॒ꣳ?स्थां ग॑च्छति । स॒ꣳस्थामिति॑ सं-स्थां । ग॒च्छ॒त्या । आ श्रा॑वय । श्रा॒व॒यास्तु॑ । अस्तु श्रौष॑ट् । श्रौष॒ड्यज॑ । यज॒ ये । ये यजा॑महे । यजा॑महे वषट्का॒रः । व॒ष॒ट्का॒र एत॑त् । व॒ष॒ट्का॒र इति॑ वषट्- का॒रः । एत॒द्वै । वै य॒ज्ञस्य॑ । य॒ज्ञस्य॒ प्राय॑णं । प्राय॑ण॒मेषा । प्राय॑ण॒मिति॑ प्र-अय॑नं । एषा प्र॑ति॒ष्ठा । प्र॒ति॒ष्ठैत॑त् । प्र॒ति॒ष्ठेति॑ प्रति-स्था ।

एतदुदयंनं । उदयंनं यः । उदयंनमित्युत्-अयंनं । य एवं । एवं वेदं । वेद प्रतिंष्ठितेन । प्रतिंष्ठितेनारिंष्टेन । प्रतिंष्ठितेनेति प्रतिं-स्थितेन । अरिंष्टेन यज्ञेनं । यज्ञेनं सꣳस्थां । सꣳस्थां गच्छति । सꣳस्थामितिं सं-स्थां । गच्छति यः । यो वै । वै सूनृतांये । सूनृतांये दोहँ । दोहं वेदं । वेदं दुहे । दुह एव । एवैनाँ । एनां यज्ञः । यज्ञो वै । वै सूनृताँ । सूनृता । आश्रांवय । श्रावयेतिं । इत्या । ऐव । एवैनाँ । एनामह्वत् । अह्वदस्तु ()

काण्ड -1, प्रपाठक -6, अनुवाक -11, अनुवाक सूक्तम -3,

प्राजापत्य-काण्डम् -विषयः -याजमान-ब्राह्मणम्,

। अस्तु श्रौषंट् । श्रौषडितिं । इत्युपावाँस्राक् । उपावाँस्राग्यजुः । उपावाँस्रागित्युंप-अवाँस्राक् । यजेतिं । इत्युत् । उदंनैषीत् । अनैषीद्वे । ये यजांमहे । यजांमह इतिं । इत्युपं । उपांसदत् । असदद्वषट्कारेणं । वषट्कारेणं दोग्धि । वषट्कारेणेतिं वषट्-कारेणं । दोग्ध्येषः । एष वै । वै सूनृतांये । सूनृतांये दोहः । दोहो यः । य एवं । एवं वेदं । वेदं दुहे । दुह एव । एवैनाँ । एनां देवाः । देवा वै । वै सत्रं । सत्रमांसत । आसत तेषाँ । तेषां दिशः । दिशो दस्यन्न् । अदन्ते । त एतां । एतामार्द्रां । आर्द्रां पङ्क्तिं । पङ्क्तिमपश्यन्न् । अपश्यन्ना । आ श्रांवय । श्रावयेतिं । इतिं पुरोवातं । पुरोवातमजनयन्न् । पुरोवातमितिं पुरः-वातं । अजनयन्नस्तु । अस्तु श्रौषंट् । श्रौषडितिं । इत्यभ्रं । अभ्रꣳ सं । समप्लावयन्न् । अप्लावयन्, यजं । यजेतिं । इतिं विद्युतँ । विद्युतमजनयन्न् । विद्युतमितिं वि-द्युतँ ()

काण्ड -1, प्रपाठक -6, अनुवाक -11, अनुवाक सूक्तम -4,

प्राजापत्य-काण्डम् -विषयः -याजमान-ब्राह्मणम्,

। अजनयन्, ये । ये यजांमहे । यजांमह इतिं । इति प्र । प्रावर्षयन्न । अवर्षयन्नभि । अभ्यस्तनयन्न् । अस्तनयन्वषट्कारेणं । वषट्कारेण ततः । वषट्कारेणेतिं वषट्-कारेणं । ततो वै । वै तेभ्यः । तेभ्यो दिशः । दिशः प्र । प्राप्यांयत । अप्यायंत यः । य एवं । एवं वेदं । वेद प्र । प्रास्मैं । अस्मै दिशः । दिशः प्यायंते । प्यायंते प्रजापतिं ।

प्रजापतिं ब्रोवेदं । प्रजापतिमिति प्रजा-पतिं । ब्रोवेदं प्रजापतिः । ब्रोवेदेतिं ब्रः-वेदं । प्रजापतिस्त्वं वेद । प्रजापतिरितिं प्रजा-पतिः । त्वंवेद यं । त्वंवेदेतिं त्वं-वेद । यं प्रजापतिः । प्रजापतिर्वेदं । प्रजापतिरितिं प्रजा-पतिः । वेद सः । स पुण्यः । पुण्यो भवति । भवत्येषः । एष वै । वै छंदस्यः । छंदस्यः प्रजापतिः । प्रजापति रा । प्रजापतिरितिं प्रजा-पतिः । आ श्रावय । श्रावयास्तुं । अस्तु श्रौषट् । श्रौषडयजं । यजु ये । ये यजामहे । यजामहे वषट्कारः । वषट्कारो यः । वषट्कार इतिं वषट्-कारः । य एवं । एवं वेदं । वेदं पुण्यः । पुण्यो भवति । भवति वसंतं ()

काण्ड -1, प्रपाठक -6, अनुवाक -11, अनुवाक सूक्तम -5,

प्राजापत्य-काण्डम् -विषयः -याजमान-ब्राह्मणम्,

। वसंतमृतूनां । ऋतूनां प्रीणामि । प्रीणामीतिं । इत्याह । आहर्तवः । ऋतवो वै । वै पयाजाः । प्रयाजा ऋतून् । प्रयाजा इतिं प्र-याजाः । ऋतूनेव । एव प्रीणाति । प्रीणाति ते । तैंऽस्मै । अस्मै प्रीताः । प्रीता यथापूर्वं । यथापूर्वं कल्पंते । यथापूर्वमितिं यथा-पूर्वं । कल्पंते कल्पंते । कल्पंतेऽस्मै । अस्मा ऋतवः । ऋतवो यः । य एवं । एवं वेदं । वेदाग्नीषोमयोः । अग्नीषोमयोरहं । अग्नीषोमयोरित्यग्नी-सोमयोः । अहं देवयज्ययाँ । देवयज्यया चक्षुष्मान् । देवयज्ययेतिं देव-यज्ययाँ । चक्षुष्मान् भूयासं । भूयासमितिं । इत्याह । आहाग्नीषोमाँभ्यां । अग्नीषोमाँभ्यां वै । अग्नीषोमाँभ्यामित्यग्नी-सोमाँभ्यां । वै यज्ञः । यज्ञश्चक्षुष्मान् । चक्षुष्मान् ताभ्याँ । ताभ्यामेव । एव चक्षुः । चक्षुरात्मन्न् । आत्मन्धत्ते । धत्तेऽग्नेः । अग्नेरहं। । अहं देवयज्ययाँ । देवयज्ययान्नादः । देवयज्ययेतिं देव-यज्ययाँ । अन्नादो भूयासं । अन्नाद इत्यन्न-अदः । भूयासमितिं । इत्याह । आहाग्निः । अग्निर्वै । वै देवानाँ । देवानामन्नादः । अन्नादस्तेनं । अन्नाद इत्यन्न-अदः । तेनैव ()

काण्ड -1, प्रपाठक -6, अनुवाक -11, अनुवाक सूक्तम -6,

प्राजापत्य-काण्डम् -विषयः -याजमान-ब्राह्मणम्,

एवान्नाद्यँ । अन्नाद्यमात्मन् । अन्नाद्यमित्यन्न-अद्यँ । आत्मन्थत्ते । धत्ते दब्धिः । दब्धिरसि । अस्यदब्धः । अदब्धो भूयासं । भूयासममुं । अमुं दभेयं । दभेयमितिं । इत्याह । आहैतयाँ । एतया वै । वै दब्ध्याँ । दब्ध्या देवाः । देवा असुरान् । असुरानदभ्नुवन्न् । अदभ्नुवन्तयाँ । तयैव । एव भ्रातृव्यं । भ्रातृव्यं दभ्नोति । दभ्नोत्यग्नीषोमयोः । अग्नीषोमयोरहं । अग्नीषोमयोरित्यग्नी-सोमयोः । अहं देवयज्ययाँ । देवयज्यया वृत्रहा। । देवयज्ययेतिं देव-यज्ययाँ । वृत्रहा भूयासं । वृत्रहेतिं वृत्र-हा । भूयासमितिं । इत्याह । आहाग्नीषोमाँभ्यां । अग्नीषोमाँभ्यां वै । अग्नीषोमाँभ्यामित्यग्नी-सोमाँभ्यां । वा इंद्रः । इंद्रो वृत्रं । वृत्र-मंहन्न् । अहन्ताभ्याँ । ताभ्यामेव । एव भ्रातृव्यं । भ्रातृव्यꣳ स्तृणुते । स्तृणुत इंद्राग्नियोः । इंद्राग्नियोरहं । इंद्राग्नियोरितींद्र-अग्नियोः । अहं देवयज्ययाँ । देवयज्ययैंद्रियावी । देवयज्ययेतिं देव- यज्ययाँ । इंद्रियाव्यन्नादः । अन्नादो भूयासं । अन्नाद इत्यन्न-अदः । भूयासमितिं । इत्याह । आहेंद्रियावी । इंद्रियाव्येव । एवान्नादः । अन्नादो भवति । अन्नाद इत्यन्न-अदः । भवतींद्रस्य ()

काण्ड -1, प्रपाठक -6, अनुवाक -11, अनुवाक सूक्तम -7,

प्राजापत्य-काण्डम् -विषयः -याजमान-ब्राह्मणम्,

। इंद्रस्याहं । अहं देवयज्ययाँ । देवयज्ययैंद्रियावी । देवयज्ययेतिं देव-यज्ययाँ । इंद्रियावी भूयासं । भूयासमितिं । इत्याह । आहेंद्रियावी । इंद्रियाव्येव । एव भवति । भवति महेंद्रस्य । महेंद्रस्याहं । महेंद्रस्येतिं महा-इंद्रस्य । अहं देवयज्ययाँ । देवयज्यया जेमानँ । देवयज्ययेतिं देव-यज्ययाँ । जेमानं महिमानं । महिमानं गमेयं । गमेयमितिं । इत्याह । आह जेमानँ । जेमानमेव । एव महिमानँ । महिमानं गच्छति । गच्छत्यग्नेः । अग्नेः स्विष्टकृतः । स्विष्टकृतोऽहं ॥ स्विष्टकृत इतिं स्विष्ट-कृतः । अहं देवयज्ययाँ । देवयज्ययायुष्मान् । देवयज्ययेतिं देव-यज्ययाँ । आयुष्मान्, यज्ञेन । यज्ञेनं प्रतिष्ठां । प्रतिष्ठां गमेयं । प्रतिष्ठामितिं प्रति-स्थां । गमेयमितिं । इत्याह । आहायुः । आयुरेव । एवात्मन् । आत्मन्धत्ते । धत्ते प्रतिं । प्रतिं यज्ञेनं । यज्ञेनं तिष्ठति । तिष्ठतीतिं तिष्ठति () ॥॥

काण्ड -1, प्रपाठक -6, अनुवाक -12, अनुवाक सूक्तम -1,

वैश्वदेव-काण्डम् -विषयः -याज्याः,

इंद्र॑ वः । वो॒ वि॒श्वतः॑ । वि॒श्वत॒स्परि॑ । परि॒ हवा॑महे । हवा॑महे॒ जनै॑भ्यः । जनै॑भ्य॒ इति॒ जनै॑भ्यः ॥ अस्माक॑मस्तु । अ॒स्तु॒ केव॑लः ॥ केव॑ल॒ इति॒ केव॑लः । इंद्र॑ नरः॑ नरो॑ ने॒मधि॑ता । ने॒मधि॑ता हवते । ने॒मधि॒तेति॑ ने॒म-धि॒ता॒ । ह॒व॒ते॒ यत् । यत्पार्या॑ः । पार्या॑ युनजते । युनजते॒ धियः॑ । धिय॒स्ताः॒ । ता इति॒ ताः ॥ शूरो॑ नृषा॑ता । नृषा॑ता॒ शव॑सः । नृषा॒तेति॒ नृ-सा॒ता॒ । शव॑सश्चकानः । च॒का॒न आ । आ गोम॑ति । गोम॑ति व्र॒जे । गोम॒तीति॒ गो-म॒ति॒ । व्र॒जे भ॑ज । भ॒जा॒ ब॑ । ब॒ नः॑ । न॒ इति॑ नः ॥ इंद्रि॒याणि॑ शतक्रतो । श॒त॒क्र॒तो॒ या । श॒त॒क्र॒तो॒ इति॑ शत-क्र॒तो॒ । या तै॑ । ते॒ जने॑षु । जने॑षु पं॒चस्॑ । पं॒चस्विति॑ पंच-सु ॥ इंद्र॒ तानि॑ । तानि॑ ते । त॒ आ आ वृ॑णे । वृ॒ण॒ इति॑ वृणे ॥ अनु॑ ते । ते॒ दा॒यि॒ । दा॒यि॒ म॒हे । म॒ह इंद्रि॑याय॑ इंद्रि॑याय॑ स॒त्रा । स॒त्रा तै॑ । ते॒ विश्व॑ । विश्व॒मनु॑ । अनु॑ वृत्र॒हत्यै॑ । वृ॒त्र॒हत्य॒ इति॑ वृत्र-हत्यै॑ ॥ अनु॑ क्ष॒त्रं ()

काण्ड -1, प्रपाठक -6, अनुवाक -12, अनुवाक सूक्तम -2,

वैश्वदेव-काण्डम् -विषयः -याज्याः,

। क्ष॒त्रम॑नु । अनु॒ सहः॑ । सहो॑ यजत्र । य॒ज॒त्रेंद्र॑ । इंद्र॑ दे॒वेभिः॑ । दे॒वेभि॒रनु॑ । अनु॑ ते । ते॒ नृष॑ह्यै । नृष॑ह्य॒ इति॑ नृ-सह्यै॑ ॥ आय॒स्मिन्॑ । य॒स्मि॒न्थ्स॒प्त । स॒प्त वा॑स॒वाः । वा॒स॒वास्ति॑ष्ठति । ति॒ष्ठ॒ति॒ स्वा॒रुहः॑ । स्वा॒रुहो॑ यथा । स्वा॒रुह॒ इति॑ स्व-रुहः॑ । य॒थेति॑ यथा ॥ ऋषि॑र्ह । ह दी॒र्घश्रु॑त्तमः । दी॒र्घश्रु॑त्तम॒ इंद्र॑स्य । दी॒र्घश्रु॑त्तम॒ इति॑ दीर्घश्रुत्-तमः । इंद्र॑स्य घ॒र्मः । घ॒र्मो अति॑थिः । अति॑थि॒रित्यति॑थिः ॥ आमा सु॑पक्व॑ । प॒क्व॒मेर॑यः । ऐर॑य॒ आ । आ सूर्य॑ । सूर्य॑ꣳ रोहयः । रो॒ह॒यो॒ दि॒वि । दि॒वीति॑ दि॒वि ॥ घ॒र्मं न । न सामन्न्॑ । साम॑न्तपत । त॒प॒ता सुवृ॑क्तिभिः॑ । सुवृ॑क्तिभि॒र्जुष्ट॑ । सुवृ॑क्तिभि॒रिति॑ सुवृक्ति-भिः॒ । जुष्ट॑ गिर्वणसे । गि॒र्व॒ण॒से॒ गिरः॑ । गिर॒ इति॒ गिरः॑ ॥ इंद्र॒मित्॑ । इद्गा॑थिनः॑ । गा॒थिनो॑ बृ॒हत्॑ । बृ॒हदिंद्र॑ । इंद्र॑म॒र्केभिः॑ । अ॒र्केभि॒रर्किणः॑ । अ॒र्किण॒ इत्य॒र्किणः॑ ॥ इंद्र॒ वाणी॑ः । वाणी॑रनूषत । अ॒नू॒ष॒तेत्य॑नूषत ॥ गाय॑ति ब्रा । ब्रा गा॒य॒त्रिणः॑ ()

काण्ड -1, प्रपाठक -6, अनुवाक -12, अनुवाक सूक्तम -3,

वैश्वदेव-काण्डम् -विषयः -याज्याः,

। गायत्रिणोऽर्चंति । अर्चंत्यर्कं । अर्कमर्किणः । अर्किण इत्यर्किणः ॥ ब्रह्माणस्त्वा । त्वा शतक्रतो । शतक्रतवुत् । शतक्रतविति शत-क्रतो । उद्वꣳ शं । वꣳशमिव । इव येमिरे । येमिर इति येमिरे ॥ अꣳ होमुचे प्र । अꣳ होमुचइत्यꣳहः-मुचै । प्रभरेम । भरेमा-मनीषां । मनीषामोषिष्ठदावे । ओषिष्ठदावे सुमतिं । ओषिष्ठदावे इत्योषिष्ठ-दावे । सुमतिं गृणानाः । सुमतिमिति सु-मतिं । गृणाना इति गृणानाः । इदमिंद्र । इंद्र प्रति । प्रति हव्यं । हव्यं गृभाय । गृभाय सत्याः । सत्याः सन्तु संतु यजमानस्य । यजमानस्य कामाः । कामा इति कामाः ॥ विवेष यत् । यन्मा । मा धिषणा । धिषणा जजानं । जजानस्तवै । स्तवै पुरा । पुरा पार्यात् । पार्यादिंद्र । इंद्रमह्नः । अह्न इत्यह्नः ॥ अꣳहसो यत्र । यत्र पीपरत् । पीपरदथा । यथा नः । नो नावा । नावेवं । इव यांतं । यांतमुभयै । उभये हवंते । हवंत इति हवंते ॥ प्र सम्राजं । सम्राजं प्रथमं । सम्राजमिति सं-राजं । प्रथममध्व- राणा ()

काण्ड -1, प्रपाठक -6, अनुवाक -12, अनुवाक सूक्तम -4,

वैश्वदेव-काण्डम् -विषयः -याज्याः,

। अध्वराणामꣳ होमुचे । अꣳहोमुचं वृषभं । अꣳहोमुचमित्यꣳहः-मुचे । वृषभं यज्ञियानां । यज्ञियानामिति यज्ञियानां ॥ अपां नपातं । नपातमश्विना । अश्विना हयंतं । हयंत- मस्मिन् । अस्मिन्नरः । नर इंद्रियं । इंद्रियं धत्तं । धत्तमोजः । ओज इत्योजः ॥ वि नः । न इंद्र । इंद्रमृधः । मृधो जहि । जहि नीचा । नीचा यच्छ । यच्छ पृतन्यतः । पृतन्यत इति पृतन्यतः ॥ अधस्पदं । अधस्पदमित्यधः-पदं । तमै । ईं कृधि । कृधि यः । यो अस्मान् । अस्माꣳ अभिदासति । अभिदासतीत्यभि-दासति ॥ इंद्र क्षत्रं । क्षत्रमभि । अभि वामं । वाममोजः । ओजोऽजायथाः । अजायथा वृषभ । वृषभ चर्षणीनां । चर्षणीना- मिति चर्षणीनां ॥ अपानुदः । अनुदो जनं । जनममित्रयंतं ।

अमित्रयंतमुरुं । अमित्रयन्तमित्यमित्र-यंतँ । उरुं देवेभ्यः । देवेभ्यो अकृणोः । अकृणोरु । उ लोकं । लोकमितिं लोकं ॥ मृगो न । न भीमः । भीमः कुचरः । कुचरो गिरिष्ठाः । गिरिष्ठाः परावतः । गिरिष्ठा इतिं गिरि-स्थाः । परावत आ । परावत इतिं परा-वतः ()

काण्ड -1, प्रपाठक -6, अनुवाक -12, अनुवाक सूक्तम -5,

वैश्वदेव-काण्डम् -विषयः -याज्याः,

। आ जगाम । जगामा परस्याः । परस्या इति परस्याः ॥ सृकꣳ सꣳशायं । सꣳशायं पविं । सꣳ-शायेतिं सं-शायं । पविमिंद्र । इंद्र तिग्मं । तिग्मं वि । वि शत्रून् । शत्रूँस्ताढि । ताढि वि । वि मृधः । मृधो नुदस्व । नुदस्वेतिं नुदस्व ॥ वि शत्रून् । शत्रून्, वि । वि मृधः । मृधो नुद । नुद वि । वि वृत्रस्यं । वृत्रस्य हनूँ । हनू रुज । हनू इति हनूँ । रुजेतिं रुज ॥ वि मन्युं । मन्युमिंद्र । इंद्रभामितः । भामितोऽमित्रंस्य । अमित्रंस्याभिदासंतः । अभिदासंत इत्यभि-दासंतः ॥ त्रातारमिंद्रँ । इंद्रंमवितारँ । अवितारमिंद्रँ । इंद्रꣳ हवें हवे । हवेंहवे सुहवँ । हवेंहव इति हवँ-हवे । सुहवꣳ शूरँ । सुहवमितिं सु-हवँ । शूरमिंद्रँ । इंद्रमितींद्रँ ॥ हुवे नु । नु शक्रं । शक्रं पुरुहूतं । पुरुहूतमिंद्रँ । पुरुहूतमितिं पुरु-हूतं । इंद्रꣳः स्वस्ति । स्वस्ति नः । नो मघवाँ । मघवा धातु । मघवेतिं मघ-वा । धाद्विंद्रः । इंद्र इतींद्रः ॥ मा तैँ । ते अस्यां ()

काण्ड -1, प्रपाठक -6, अनुवाक -12, अनुवाक सूक्तम -6,

वैश्वदेव-काण्डम् -विषयः -याज्याः,

। अस्याꣳ सहसावन्न् । सहसावन्परिष्टौ । सहसावन्नितिं सहसा-वन्न् । परिष्टावघायं । अघायं भूम । भूम हरिवः । हरिवः परादे । हरिव इतिं हरि-वः । परादा इतिं परा-दे ॥ त्रायस्व नः । नोऽ वृकेभिः । अवृकेभि-र्वरूंथैः । वरूंथैस्तवं । तवं प्रियासः । प्रियासः सूरिषुं । सूरिषुं स्याम । स्यामेतिं स्याम ॥ अनवस्ते । ते रथँ । रथमश्वांय ।

अश्वा॑य तक्षन् । तक्ष॒न्त्वष्टा॑ । त्वष्टा॒ वज्र॑म् । वज्रं॑ पुरुहूत । पु॒रु॒हू॒त॒ द्यु॒मन्त॑म् । पु॒रु॒हू॒तेति॑ पुरु-हूत । द्यु॒मन्त॒मिति॑ द्यु-मन्त॑म् ॥

ब्रह्मा॑ण इन्द्र॑ । इन्द्र॑ म॒हय॑तः । म॒हय॑तो अ॒र्कैः । अ॒र्कैर॑वर्धयन् । अव॑र्धयन्नहये । अह॑ये हन्त॒वै । ह॒न्त॒वा उ॑ । उ॒ वित्यु॑ ॥

वृष्णे॒ यत् । यत्ते॑ । ते॒ वृष॑णः । वृष॑णो अ॒र्कम् । अ॒र्कम॑र्चान् । अर्चा॑निन्द्र॑ । इन्द्र॒ ग्रावा॑णः । ग्रावा॑णो अदितिः । अदि॑तिः

स॒जोषा॑ः । स॒जोषा॒ इति॑ स-जोषा॑ः ॥ अ॒न॒श्वासो॒ ये । ये प॒वय॑ः । प॒वयो॑ऽरथाः । अ॒र॒था इन्द्रे॑षिताः । इन्द्रे॑षिता

अ॒भ्य॑वर्तत । इन्द्रे॑षिता इतीन्द्र॑-इषिताः । अ॒भ्य॑वर्तत॒ दस्यू॑न् । अ॒भ्य॑वर्त॒न्त्येत्य॑भि-अव॑र्तन्त । दस्यू॒निति॒ दस्यू॑न् () ॥॥

काण्ड -1, प्रपाठक -7, अनुवाक -1, अनुवाक सूक्तम -1,

प्राजापत्य-काण्डम् -विषयः -याजमान-ब्राह्मणम्,

॥ इति प्रथमकांडे षष्ठप्रश्नस्य क्रमपाठः समाप्तः ॥ क्रमपाठः पा॒क॒य॒ज्ञं वै । पा॒क॒य॒ज्ञमिति॑ पाक-य॒ज्ञं । वा अनु॑ ।

अन्वाहि॑ताग्नेः । आहि॑ताग्नेः प॒शव॑ः । आहि॑ताग्नेरित्याहि॑त-अ॒ग्नेः । प॒शव॒ उप॑ । उप॑ तिष्ठन्ते । ति॒ष्ठ॒न्त॒ इडा॑म् ॥ इडा॒ खलु॑

। खलु॒ वै । वै पा॑कय॒ज्ञः । पा॒क॒य॒ज्ञस्सा । पा॒क॒य॒ज्ञ इति॑ पाक-य॒ज्ञः ॥ सै॒षा । ए॒षान्त॒रा । अ॒न्त॒रा प्र॑याजानूयाजान्

। प्र॒या॒जा॒नू॒या॒जान् यज॑मानस्य । प्र॒या॒जा॒नू॒या॒जानि॑ति प्रयाज-अ॒नू॒या॒जान् । यज॑मानस्य लो॒के । लो॒केऽव॑हिता ।

अव॑हिता॒ ताम् । अव॑हि॒तेत्यव॑-हिता । तामा॑ह्रिय-मा॑णाम् । आ॒ह्रि॒यमा॑णाम॒भि । आ॒ह्रि॒यमा॑णामित्या॑-ह्रियमा॑णाम् ।

अ॒भि॒मं॒त्र॒येत । मं॒त्र॒येत॒ सुरू॑पवर्षवर्णे । सुरू॑पवर्षवर्ण॒ आ । सुरू॑पवर्षवर्ण॒ इति॒ सुरू॑प-वर्षवर्णे । एहि॑ । इ॒हीति॑ ।

इति॑ प॒शव॑ः । प॒शवो॒ वै । वा इडा॑म् । इडा॑म् प॒शून् । प॒शूने॒व । एवोप॑ । उप॑ह्वयते । ह्व॒य॒ते॒ य॒ज्ञं । य॒ज्ञं वै । वै दे॒वाः

। दे॒वा अदु॑ह्वन् । अदु॑ह्व॒न्, य॒ज्ञः । य॒ज्ञोसु॑रान् । असु॑रा॒ अदुहत् । अ॒दु॒ह॒त्ते । तेऽसु॑राः । असु॑रा य॒ज्ञ-दु॑ग्धाः ।

य॒ज्ञदु॑ग्धाः परा॑ । य॒ज्ञदु॑ग्धा॒ इति॑ य॒ज्ञ-दु॒ग्धाः । परा॑भवन् । अ॒भ॒व॒न य॑ः । यो वै । वै य॒ज्ञस्य॑ । य॒ज्ञस्य॒ दोह॑म् । दोह॑

वि॒द्वान् ()

काण्ड -1, प्रपाठक -7, अनुवाक -1, अनुवाक सूक्तम -2,

प्राजापत्य-काण्डम् -विषयः -याजमान-ब्राह्मणम्,

। विद्वान्, यजते । यजतेपिं । अप्यन्यं । अन्यं यजमानं । यजमानं दुहे । दुहे सा । सा मैं । मे सत्या । सत्याशीः । आशीरस्य । आशीरित्याँ-शीः । अस्य यज्ञस्यं । यज्ञस्यं भूयात् । भूयादितिं । इत्याह । आहेपः । एष वै । वै यज्ञस्यं । यज्ञस्य दोहः । दोहस्तेनं । तेनैव । एवैनँ । एनं दुहे । दुहे प्रत्ताँ । प्रत्ता वै । वै गौः । गौर्दुहे । दुहे प्रत्ताँ । प्रत्तेडाँ । इडा यजमानाय । यजमानाय दुहे । दुह एते । एते वै । वा इडायै । इडायै स्तनाँः । स्तना इडाँ । इडोपहूता । उपहूतेतिं । उपहूतेत्युप-हूता । इतिं वायुः । वायुर्वत्सः । वत्सो यर्हि । यर्हि होताँ । होतेडाँ । इडामुप-ह्वयेत । उपह्वयेत तर्हि । उपह्वयेतेत्युप-ह्वयेत । तर्हि यजमानः । यजमानो होतारं । होतारमीक्षमाणः । ईक्षमाणो वायुं । वायुं मनसा । मनसा ध्यायेत् ()

काण्ड -1, प्रपाठक -7, अनुवाक -1, अनुवाक सूक्तम -3,

प्राजापत्य-काण्डम् -विषयः -याजमान-ब्राह्मणम्,

। ध्यायेन्मात्रे । मात्रे वत्सं । वत्समुपावसृजति । उपावसृजति सर्वेण । उपावसृजतीत्युप- अवसृजति । सर्वेण वै । वै यज्ञेनं । यज्ञेनं देवाः । देवास्सुवर्गं । सुवर्गं लोकं । सुवर्गमितिं सुवः-गम् । लोकमायन्न् । आयन्पाक- यज्ञेनं । पाकयज्ञेन मनुः । पाकयज्ञेनेतिं पाक-यज्ञेन । मनुरश्राम्यत् । अश्राम्यत्सा । सेडाँ । इडा मनुँ । मनुमुपावर्तत । उपावर्तत तां । उपावर्ततेत्युप-आवर्तत । तान्देवासुराः । देवासुरा वि । देवासुरा इतिं देव-असुराः । व्यह्वयंत । अह्वयंत प्रतीचीँ । प्रतीचीँ देवाः । देवाः परांचीं । परांचीमसुराः । असुराः सा । सा देवान् । देवानुपावर्तत । उपावर्तत पशवः । उपावर्ततेत्युप-आवर्तत । पशवो वै । वै तत् । तद्देवान् । देवानवृणत । अवृणत पशवः । पशवोऽसुरान् । असुरानजहुः । अजहुर्यं । यं कामयेत । कामयेता पशुः । अपशुः स्याँत् । स्यादितिं । इति परांचीं । परांचीं तस्यं । तस्येडाँ । इडामुपं । उपं ह्वयेत । ह्वयेता पशुः । अपशुरेव । एव भवति । भवति यं ()

काण्ड -1, प्रपाठक -7, अनुवाक -1, अनुवाक सूक्तम -4,

प्राजापत्य-काण्डम् -विषयः -याजमान-ब्राह्मणम्,

। यं कामयेत । कामयेत पशुमान् । पशुमान्थ्स्यात् । पशुमानिति पशु-मान् । स्यादिति । इति प्रतीचीँ । प्रतीचीं तस्यं । तस्येडाँ । इडामुपं । उपं ह्वयेत । ह्वयेत पशुमान् । पशुमानेव । पशुमानिति पशु-मान् । एव भवति । भवति ब्रह्मवादिनः । ब्रह्मवादिनो वदंति । ब्रह्मवादिन इति ब्रह्म-वादिनः । वदंति सः । स तु । बै । वा इडाँ । इडामुपं । उपं ह्वयेत । ह्वयेत यः । य इडाँ । इडामुप-हूयं । उपहूयात्मानँ । उपहूयेत्युप-हूयं । आत्मानमिडायां । इडायामुपह्वयेत । उपह्वयेतेतिं । उपह्वयेतेत्युप-ह्वयेत । इति सा । सा नः । नः प्रिया । प्रिया सुप्रतूँर्तिः । सुप्रतूँर्तिर्मघोनीँ । सुप्रतूँर्तिरितिं सु-प्रतूँर्तिः । मघोनीतिं । इत्याह । आहेडाँ । इडामेव । एवोपहूयं । उपहूयात्मानँ । उपहूयेत्युप-हूयं । आत्मानमिडायां । इडाया-मुपं । उपह्वयते । ह्वयते व्यस्तं । व्यस्तमिव । व्यस्तमिति वि-अस्तं । इव वै । वा एतत् । एतद्यज्ञस्यं । यज्ञस्य यत् । यदिडाँ । इडा सामि । सामि प्राश्नंति । प्राश्नांतिं सामि । प्राश्नन्तीतिं प्र-अश्नंतिं ()

काण्ड -1, प्रपाठक -7, अनुवाक -1, अनुवाक सूक्तम -5,

प्राजापत्य-काण्डम् -विषयः -याजमान-ब्राह्मणम्,

। सामि मार्ँजयंते । मार्जयंत एतत् । एतत्प्रतिं । प्रति वै । वा असुंराणां । असुंराणां यज्ञः । यज्ञो वि । व्यच्छिद्यत । अच्छिद्यत ब्रह्मंणा । ब्रह्मंणा देवाः । देवाः सं । समंदधुः । अदधुर्बृहस्पतिः । बृहस्पतिं स्तनुतां । तनुतामिमं । इमं नः । न इतिं । इत्याह । आह ब्रह्मं । ब्रह्म वै । वै देवानाँ । देवानां बृहस्पतिः । बृहस्पतिर्ब्रह्मंणा । ब्रह्मंणैव । एव यज्ञं । यज्ञꣳ सं । सं दंधाति । दधाति विच्छिंन्नं । विच्छिंन्नं यज्ञं । विच्छिंन्नमिति वि-च्छिन्नं । यज्ञꣳ सं । समिमं । इमं दंधातु । दधाबितिं । इत्याह । आह संतंत्यै । संतंत्यै विश्वैँ । संतंत्या इति सं-तत्यै ॥ विश्वे देवाः । देवा इह ।

इह मादयंतां । मादयंतामिति । इत्याह । आह संतत्यं । संतत्येव । संतत्येति सं-तत्यं । एव यज्ञं । यज्ञं देवेभ्यः । देवेभ्योऽनु । अनु दिशति । दिशति यां । यां वै ()

काण्ड -1, प्रपाठक -7, अनुवाक -1, अनुवाक सूक्तम -6,

प्राजापत्य-काण्डम् -विषयः -याजमान-ब्राह्मणम्,

